No. १९३०

Title भगवद्गीतार्थसंग्रहः

Author अभिनवगुप्तः

Extent ६४ Age x

Subject वेदान्त शास्त्रं

भगवद्गीताटीका भगवद्गीतार्थसंग्रहः

१९३०

पत्राणि ६४

No 1930

F. 64 sixty four
complete

अभिनवगुप्ताचार्यकृत गीताव्याख्या



गी॰
स॰
१

ॐ श्रीकृष्णार्जुनाभ्यां नमः ॐ नमः श्रीगुरवे ॐ यः प्रविततस्फुरद्द्विविधभावचक्रात्मकः परस्परविभेद
वान्विषयतामुपागच्छति यदेकमयभावनावशतएव भेदान्वयैः स शाम्भवशिवात्मको जयति बोधभास्वा
न्निधिः द्वैपायनेन मुनिना यदिदं व्यधायि शास्त्रं सहस्रशतसम्मितमत्र मोक्षः प्राधान्यतः फलतया प्रथित
स्तदन्यधर्मोहितसम्प्रतिबोधयितुं प्रगीतम् मोक्षश्च नाम सकलाप्रविभागरूपसर्वज्ञसर्वकरणादिशुभस्व
भावे आत्मनोऽस्य विरहिते भगवत्यधीशे नित्योदिते लयईयात्मस्थितिः समासात् यद्यप्यन्यप्रसंगेषु मोक्षो
नामात्र गीयते तथापि भगवद्गीताः सम्यक्कृत्याभिदायिकाः ताश्चेमेः साक्षेनैर्व्याख्याः कृता यद्यपि भूय
सा व्याख्यातृभिः पूर्वैर्मामेतदुद्धार्थप्रदर्शकः भट्टेन्दुराजादाम्नायविविच्यचिविधिया कृतोऽभिनव
गुप्तेन सोऽयं गीतार्थसंग्रहः विद्याविद्यात्मकतयोरभिभाव्याभिभावात्मकत्वे प्रदर्शयितुं प्रथमाध्या
यप्रस्तावः तत्रानुत्तमविद्यालेशावकाशउपदेशभाजनेनापि निर्मूलितसमस्ताविद्याप्रपञ्चः प्रका
कोऽपि विज्ञानमाननतः कोऽदेश्याविधितप्रशकानात् अज्ञाविपर्ययस्तयास्तत्पदेशानेयद्रुच्यते तत्का
विदेव तथा तैऽन्यैव्यपदेष्टव्यतर्थे संदिग्धतेव अतएव संशयनिर्णीतकपवोपदेश इति विद्याविद्या
गर्भेयद्धमयः संशयउच्यते देवावरस्पष्टिश्च विद्याविद्यामयीति तत्कथोपक्रमणमेव मोक्षमार्गोपा

देशाने स्थानेवमयथानेकर्माणिवापहेतव्यानीतिकर्मणांज्ञाननिष्ठतयाक्रियमाणानामपिनबंधकत्वमि
तिमायायांमे नांतरीयकत्वेनकर्माणि नन्वज्ञानकर्मणीसमुच्चययासमुच्चीयेते इत्यत्रनाग्रहम् एवमेवव्यवस्थितेना
भिप्रायेणयथास्थानेप्रतिपादयिष्यामइतिकिमनेनपल्लवदर्शनविघ्नमात्रफलैर्वाग्जालैः । धृतराष्ट्र उवाच । धे
र्मक्षेत्रेकुरुक्षेत्रेसमवेतसमागमे मामकाःपांडवाश्चैवकिमकुर्वतसंजय संजय उवाच दृष्ट्वातुपांडु
वानीकंव्यूढंदुर्योधनस्तदा आचार्यमुपसंगम्यराजावचनमब्रवीत् पश्यैतांपांडुपुत्राणामाचार्यमहतीं
चमूम् व्यूढांद्रुपदपुत्रेणतवशिष्येणधीमता अत्रशूरामहेष्वासाभीमार्जुनसमायुधि युयुधानोविराट
श्चद्रुपदश्चमहारथः धृष्टकेतुश्चेकितानःकाशिराजश्चवीर्यवान् पुरुजित्कुंतिभोजश्चशैब्यश्चनरपुं
गवः युधामन्युश्चविक्रांतउत्तमौजाश्चवीर्यवान् सौभद्रोद्रौपदेयाश्चसर्वएवमहारथाः अस्माकंतु
विशिष्टायेतान्निबोधद्विजोत्तम नायकाममसैन्यस्यसंज्ञार्थंतान्ब्रवीमिते भवान्भीष्मश्चकर्णश्चकृपःश
ल्योजयद्रथः अश्वत्थामाविकर्णश्चसोमदत्तिश्चवीर्यवान् अन्येचबहवःशूरामदर्थेत्यक्तजीविताः ना
नाशस्त्रप्रहरणानानायुद्धविशारदाः ९ अत्रकेचिद्व्याख्याविकल्पमाहुः कुरूणांकरणात्तायत्तेत्रमत्र
याहक अतएवसामासिकत्वधर्माणांसर्वेषामालयत्वमतिनिमित्तात् अथसपरमाधर्मायत्यागेनात्मदर्शन

भिमन्यवश्चभिमन्तेते समस्तधर्माणां तथा द्रुपदश्चात्माणाभूतेनदधिकाद्विशास्त्रौरसर्वलयाणं त्वदेहिं साथ्यैना
मरस्यव अद्यातकभावेनवर्तमानानां नानात्वैरायुधैः यत्र सामग्रभूतानां समागमो यत्र तस्मिन् स्थिताये मामकाश्चा
विद्याप्रकृतेविनाअविद्यामयाः मे कल्पाः पाण्डवाः शुद्धविद्याप्रकृतेविनाविद्यात्मानः ते किमकुर्वत केः खलु
केजिताः इति यावत् ममेतिकायतीति मामकः अविद्याः प्रकृताः पाण्डुः शुद्धः किं वानेन परिगणनेनेदं तावद्दल
तत्त्वमित्याह अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् भीमसेनाभि
रक्षितं पाण्डवीयं बलमस्माकमपर्याप्तं जेतुमशक्यं अथवा पर्याप्तं कियत्तदस्मद्बलस्येत्यर्थः इदं तु भीष्मा
भिरक्षितं बलमस्माकं मे वेषि एतेषां पाण्डवानां पर्याप्तं जेतुं शक्यं यद्विवा पर्याप्तमेव बहूनसमर्थे जयमेतेविति १०
अयनेषु च सर्वेषु यथाभागमवस्थिताः भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि अयनानि विषयः ११ तस्य सं
जनयन्हर्षं कुरुः वृद्धः पितामहः सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् ततः शंखाश्च भेर्यश्च पणवा
नकगोमुखाः सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ माधवः पाण्ड
वश्चैव दिव्यौ शंखौ प्रदध्मतुः पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः पौण्ड्रं दध्मौ महाशंखं भीमकर्मा वृको
दरः अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः नकुलः सहदेवश्च सुघोषमणिपुष्पकौ काश्यश्च परमेष्वासः

शिखंडीचमहारथः धृष्टद्युम्नोविराटश्चसात्यकिश्चापराजितः पांचालश्चमहेष्वासोद्रौपदेयाश्चपंचये।
सौभद्रश्चमहाबाहुः शंखान्दध्मुःपृथक्पृथक् सघोषोधार्त्तराष्ट्राणांहृदयानिव्यदारयत् नभश्चपृथिवीं
चैवतुमुलोव्यनुनादयन् अथव्यवस्थितान्दृष्ट्वाधार्त्तराष्ट्रान्कपिध्वजः प्रवृत्तेशस्त्रसंपातेधनुरुद्यम्यपांडवः।
हृषीकेशंतदावाक्यमिदमाहमहीपते अर्जुनः सेनयोरुभयोर्मध्येरथंस्थापयमेच्युत यावदेतान्निरीक्षे
योद्धुकामानवस्थितान् कैर्मयासहयोद्धव्यमस्मिन्रणसमुद्यमे योत्स्यमानानवेक्षेहंयएतेत्रसमागताः धा
र्त्तराष्ट्रस्यदुर्बुद्धेर्युद्धेप्रियचिकीर्षवः संजयः एवमुक्तोहृषीकेशोगुडाकेशेनभारत सेनयोरुभयोर्मध्ये।
स्थापयित्वारथोत्तमम् भीष्मद्रोणप्रमुखतःसर्वेषांचमहीक्षिताम् उवाचपार्थपश्यैतान्समवेतान्कुरूनि
ति तत्रापश्यत्स्थितान्पार्थः पितॄनथपितामहान् आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा श्वशुरा
न्सुहृदश्चैवसेनयोरुभयोरपि तान्समीक्ष्यसकौंतेयःसर्वान्बंधूनवस्थितान् कृपयापरयाविष्टःसीदमानो।
ब्रवीदिदं अर्जुनः दृष्ट्वेमान्स्वजनान्कृष्णयुयुत्सून्समवस्थितान् सीदंतिममगात्राणिमुखंचपरिशुष्यतिवे
पथुश्चशरीरेमेरोमहर्षश्चजायते गांडीवंस्रंसतेहस्तात्त्वक्चैवपरिदह्यते नचशक्नोम्यवस्थातुंभ्रमतीवचमेम
नः निमित्तानिचपश्यामिविपरीतानिकेशव नचश्रेयोनुपश्यामिहत्वास्वजनमाहवे नकांक्षेविजयंकृष्ण

नराज्येनसुखानिच किंनोराज्येनगोविंदकिंभोगैर्जीवितेनवा येषामर्थेजीवितंमेराज्यंभोगाःसुखानिच
किंनोराज्येनगोविंदकिंभोगैर्जीवितेनवा ३ तइमेवस्थितायुद्धेप्राणांस्त्यक्त्वाधनानिच आचार्याःपितरःपुत्रा
स्तथैवचपितामहाः मातुलाःश्वशुराःपौत्राःस्यालाःसंबंधिनस्तथा एतान्नहंतुमिच्छामिघ्नतोपिमधुसूदन
अपित्रैलोक्यराज्यस्यहेतोःकिंनुमहीकृते निहत्यधार्तराष्ट्रान्नःकाप्रीतिःस्याज्जनार्दन पापमेवाश्रयेदस्मान्हत्वै
तानाततायिनः अमीआचार्यादयइतिविशेषबुद्ध्यावृद्धावाचोप्यमाणाबुधकर्मेतयाऽवधेपापदायिनः
तथाभोगसुखादिदृष्टार्थमेतद्युद्धंक्रियतइतिबुद्ध्याक्रियमाणंयुद्धंसर्वथाहनना दिनदवश्यंपातककारी
तिसर्वपत्ताभिप्रायः अतएवस्वधर्ममात्रतयैवकर्माण्यनुतिष्ठन्नविशेषयिथैनमंदैदास्यते निहत्यधार्तेति
आततायिनोहननेपापमेवकर्तृअतोयमर्थः पापेनतावदेतेस्माच्यक्त्रैवोहताः पुनस्तैत्र्येकृताः तोस्मानिहत्या
स्मानप्याश्रयेत् पापमस्लोभवशात्कुलक्षयादिदोषाऽदर्शनम् अतएवकुलादिधर्माणामुपदेशंकरो
तिस्वजनेहिकथमित्यादिना ३६ तस्मान्नार्हावयंहंतुंधार्तराष्ट्रान्सबांधवान् स्वजनंहिकथंहत्वासुखिनःस्या
ममाधव विशेषफलबुद्ध्याहननादिविशेषबुद्ध्यावाहननेमहापातकमितिमनदेवसंक्षिप्याभिधानम् ३७ पतिता
पातिशयमहत्वनायात्मगतमेवार्जुनोवचनामाहप्रहोवेनेति यद्यप्येतेनपश्यंतिलोभोपहतचेतसः कुलक्ष

२

क्षयकृतं दोषं मित्रद्रोहे च पातकम् कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुं कुलक्षयकृतं दोषं प्रपश्यद्भि
र्जनार्दन कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः धर्मे नष्टे कुले कृत्स्नमधर्मोभिभवत्युत अधर्माभिभवा
त्कृष्ण प्रदुष्यन्ति कुलस्त्रियः स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः संकरो नरकायैव कुलघ्नानां कुलस्य
च पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः उत्साद्यन्ते जातिधर्माः
कुलधर्माश्च शाश्वताः उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन नरके नियतं वासो भवतीत्यनुशुश्रुम अ
हो बत महत्पापं कर्तुं व्यवसिता वयम् यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः वयमिति कौरवपाण्डवभे
दभिन्नाः सर्व एवमर्थ्यः एवं सर्वेष्वविवेकिषु मम विवेकिनः किमुचितं उचितं तावद्युद्धान्निवर्तनं एतन्नु
चिन्तनरम्भिमाह यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् संजयः
एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् विसृज्य सशरं चापं शोकसंविग्नमानसः ४७ इति श्रीभगवद्गी
तास्वर्जुनविषादो नाम प्रथमोऽध्यायः १ तत्र संग्रहश्लोकः विद्याविद्योभयाचान्तसंशयद्वैविधीकृतः युद्धाद
यमपि समस्तानि विवेकाभवन्मतिः श्रीगीतार्थसंग्रहे श्रीमदभिनवगुप्तविरचिते प्रथमः संजयः तं तथा कृ
पयाविष्टमश्रुपूर्णाकुलेक्षणम् सीदमानमिदं वाक्यमुवाच मधुसूदनः १ आद्ये लोकव्यवहाराश्रयणेव श्री

भगवानर्ज्जुनं प्रतिबोधयति कश्मलं त्वा नेकरिष्यतीममनोऽनार्यजुष्टमित्याह क्लैव्यादिभिर्निर्भर्त्सनमभिदधत्
धर्मे उद्धतोऽभिमानोऽयमित्यादि दर्शयति श्रीभगवानुवाच कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् अना
र्यजुष्टमस्वर्ग्यमकीर्तिकरमर्ज्जुन क्लैव्यं मास्म गमः पार्थ नैतत्त्वय्युपपद्यते क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ पा
रंतपः अर्ज्जुनः कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन गुरूनह
त्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके हत्वार्थकामांस्तु गुरूनिहैव भुंजीय भोगान् रुधिरप्रदिग्धान् नचै
तद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्त
राष्ट्राः कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्य
स्तेऽहं शाधि मां त्वां प्रपन्नम् न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणाम् अवाप्य भूमावस
पत्नमृद्धं राज्यं सुराणामपि चाधिपत्यं संजयः एवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः नयोत्स्य इति गोविंद
मुक्त्वा तूष्णीं बभूव ह तमुवाच हृषीकेशः प्रहसन्निव भारत सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः भीष्मद्रो
णाविमावित्यादिना भुंजीय भोगानित्यनेन च कर्मविशेषानुसंधानेन चेद्देयतया स्वविषमत्वं सूचयति नचैतद्विद्म इत्यनेना
च कर्मविशेषानुसंधानमाह निःश्रेयसेयानेतावत्कर्मणोपपद्यते नचपराजयमभिसंधाय युद्धे प्रवर्तनं जयोऽपि

वायमनर्थएव नत्वाह अहन्त्वाग्रहैर्भेत्तमपि चर्त्तुं श्रेयः एतस्य निश्चेतमशक्तो किंजयेकोवाम: किं
वापराजयाजयेपिवंधूनांविनाशात् सेनयोरुभयोर्मध्यश्मतेनेदं वृचयति सेशयाविष्टोर्जुनोनैकपदेत्ण
युद्धान्निवृत्तोयतएवमाहतस्मशाधिमांप्रपन्नमिति ९ अतउभयोरपित्तानाज्ञानयोर्मध्यगः श्रीभगवनानुशि
ष्यते तमानुषेणोपदत्तोतराम्मा विषादमोहाभिभवाद्विसंज्ञः कृपायहीतः समवीक्ष्य वेषनभिप्रपन्नान्
त्वमेनकस्य मानुषमनुष्यभावः श्रेनकमुखेनयमेनप्रविष्टाइतिनवकोवाच: १० अशोच्यानन्वशोचा
स्त्वं प्रज्ञावादांश्च भाषसे गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः शोचितमशक्यं कलेवरे सदा नश्वरत्वा
त् अशोचनादेमात्मानेचशोचसि नकश्चिदुतासुर्मृतोगतासुर्जीवत्वाशोच्योस्ति तथाह्यात्मतावदा
विनाशीनानाशरीरेषु संचरतः कासशोच्यता नवदेहान्तरसंचारएवशोच्यता एवेद्धियौवनादावपि
शोच्यता भवेत् ११ एवमर्थं हृद्यमाह नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः नचैवनभविष्यामः सर्वेव
यमतःपरं देहिनोस्मिन्यथादेहेकौमारंयौवनंजरा तथादेहान्तरप्राप्तिर्धीरस्तत्रनमुह्यति अस्मिन्देहिनेवना
त्वस्यपिनाशे एवंनमसीचराजानः देहिनोस्मित्रिति प्राकारान्तरेणसनियदिशोच्यतानहिकौमाराद्यो वा
नाशेमेकिमितिनशोच्यते योधीरस्तनुशोचति येयंचेतनक्रुशरीरोपिप्रसाद्यानास्तितेनस्तुकर्मनतस्त्रा

ये यमन्विष्टः १३ आथी तन्मात्राशब्दवार्थैर्थैर्थैकृताः स्पर्शा इन्द्रियद्वारेणात्मनः संवेद्याः उक्तनायाः शी
तोष्णसुखदुःखाद्यवस्थाश्च नियताः तां वपिशो वेत्ति नेत्ते वेत्थी तस्मात् मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखा
दुःखदाः आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥ अथवा मात्राभिरिन्द्रियैर्विषयाणां स्पर्शा न तु साक्षादा
त्मना आगमश्च तस्मिन्नपायो विनाशः परनुश्चक्रो स्तितिक्षस्व सहस्व १४ यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ सम
दुःखसुखं धीरं सोऽमृतत्वाय कल्पते १५ ननु यत एवागमापायिन एते सर्वे दशाविशेषास्तत एव शोच्यन्ते ।
मैवं यथा हि कोऽयमागमो नाम उत्पत्तिरिति चेत् सापि काप्यसतः आत्मलाभः स्यादिति चेत् असत्स्वभावता
हि निःस्वभावता निरात्मता निरात्मावस्तुस्वभावः कथं सत्त्वभावीकर्तुं शक्यः अनीलं हि न नीलीकर्तुं शक्यं
क्यं स्वभावान्तरापत्तेरदृष्टत्वात् तथा च शास्त्रे न हि स्वभावो भावानां व्यावर्तेत औष्ण्यवद्रवेरिति अथ सत एवात्म
लाभ उत्पत्तिः न तदा लब्धात्मनोऽस्य जातस्याभावान्नित्यत्वे ष्वागमे काशोच्यता एवमपायोऽपि सतोऽसतो वा असत
श्चावदस्त्वेव सत्त्वभावस्यापि कथमसत्तास्वभावः द्वितीयेऽक्षणे सा च सत्त्वभाव इति चेत् आद्येऽपि तथा स्यादिति
तिनकश्चिद्भावः स्यात् स्वभावस्यामागमात् अथ मुद्गरादिना स्य नाशः क्रियते सर्वं हि तदा निःस्वभावस्य किं
हते नष्टप्र्वेति इति चेत् मा नाम दर्शि भावो न त्वसत्त्वं प्राप्तः पटादिवत् इव अव्यतिरिक्तस्तु नाशो विभ्रमे तरेत

न्मेवेत्याह नासतो विद्यते भावो नाभावो विद्यते सतः उभयोरपि दृष्टोन्तस्त्वनयोस्तत्त्वदर्शिभिः। अयमवलोकह
तेनेदमाह असतोऽनित्यस्य विनाशिनः शरीरस्य न भावः अनवरतमवस्थाभिः परिणामित्वात् नित्यस्य तस्य परमा
त्मनो नास्ति कदाचिद्विनाशः परिणामधर्मित्वात् तथा च वेदः अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मेति ।
अनयोः सदसतोरेवंतः प्रतिष्ठापदेयज्ञानयोर्विश्रान्तिः १६ यत्तत्त्वदर्शिभिर्दृष्टः सत्त्वं तन्नित्यो नित्यो वेत्याशंक्या
ह अविनाशि तु तद्विद्धि येन सर्वमिदं ततं विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति तस्यार्थे आत्मा न विनाशी
१७ अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः विनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत निरूपाख्यता कालेस्य
ल विनाशयोगिनः तदस्य थानुपपत्तेरेव च विनाशिनः अप्रलक्षणमवस्थान्तरभागिनः यदुक्तं अंतेश्रु राणेह
स्वामतित्वलक्षणे नवनदशानिरुत्तमीयते इति मुनिनापि कलानां समयग्यानां प्रतिभेदः क्षणोक्षणो वर्त्तेते सर्वभावेषु
तोऽस्मात्संभु विभाव्यते इति इत्थं गर्गानामिति निरुप्य गार्थे क्रियाकारित्वादितियावत् देहा अंतवंतो विनाशि
नस्य आत्मा तु नित्यो यतोऽप्रमेयः अप्रमेयस्य तज्जडस्य परिणामित्वेन तज्जडस्य विवेकरूपस्य स्वभावान्तरायोगात् प
वं देहा नित्यमेतवंत इति पोविक्रमशक्या आत्मा नित्यमविनाशीति तेन न शोचनादेः तेत्रेणायमेकः हन्तायम
न्याहं योत्स्ये यो मे नित्यादर्शिनः अशोच्यानन्वशोच इति १८ य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् उभौ तौ न वि

गी॰
सं॰
६

6

जानीतो नायं हंति न हन्यते एनमात्मानं देहं च यो हंतारं हतं च वेत्ति तस्मादज्ञानेनात एव सबद्धः १९ न जायते म्रियते वा
कदाचिन्नायं भूत्वा भविता वा न भूयः अजो नित्यः शाश्वतोयं पुराणो न हन्यते हन्यमाने शरीरे एतदेव स्फुटयति ना
यं भूत्वेति अयमात्मा न न भूत्वा भविता पितु भूत्वैव अतो न जायते न च म्रियते यतो भूत्वा न नित्य भविता पितु भवितैव
२० वेदाविनाशिनं नित्यं य एनमजमव्ययं कथं स पुरुषः पार्थ हन्यते हंति वा कथं य एनमात्मानं अवध्यत्वाज्ज्ञाना
ति न स हंति न स हन्यते इति तस्य कथं वधः २१ वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि तथा
शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही यथा वस्त्राच्छादितस्य देहस्य नाशो न भवति न वस्त्रान्तरो हतो
न विनश्यति एवमात्मा देहान्तरावृतः २२ नैनं छिंदंति शस्त्राणि नैनं दहति पावकः नैवैनं क्लेदयंत्यापो न शो
षयति मारुतः अच्छेद्योयमदाह्योयमक्लेद्योऽशोष्य एव च नित्यः सर्वगतः स्थाणुरचलोयं सनातनः नास्य ना
शकारणं शस्त्रादि किंचित्करोति देकस्वभावस्य नाशिनस्य निरंशस्य सतत्वस्य स्वभावोन्यथा न तस्मात् अस्य विनाशा
वयवविभागविरोधिप्रादुर्भावादिक्रमेण नाशयितुमशक्यत्वात् न च देहान्तरगमनमस्मात् सर्वदेहान्तरगञ्छति
तेन सम्बध्यतेऽयमर्थः देहस्य तत्तु मात्रमस्य न च व्याधिकात् एवं भूते विदिते न मात्मानं शोचितुं नार्हसि अव्य
क्तोयमचिंत्योयमविकार्योयमुच्यते तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि २५ अथ चैनं नित्यजातं नित्यं वा मन्य

सेमृतम् तथापित्वंमहाबाहोनैवंशोचितुमर्हसि अथात्मानंदेहंमन्यसेनित्यजातंमृतंवादस्याविनाशात् त
थापिनशोच्यता तस्मात्कुशक्तियथावानित्यविनाशिनेनथापिकाशोच्यता एवंयथात्मनस्तद्देहयोगवियोगा
भ्यांनित्यजातत्वेनित्यमृतत्वेवामन्यसेतथापित्वंव्यथाशोचनेप्रामाणिकानामयुक्तम् २६ नचैतदन्यथानित्यता
नित्यत्वमुपपत्तिमत् यतः जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच तस्मादपरिहार्येऽर्थेनत्वंशोचितुमर्हसि
जन्मनएवानंतरंनाशोनाशादनंतरंजन्मेतिचक्रवदयंजन्ममरणप्रसंगोनातइतिकिंपरिमाणंशोच्यतामिति २७ अ
पिच अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत अव्यक्तनिधनान्येवतत्रकापरिदेवना निमाःसंतनिमावा यस्ता
वदस्यशोचकस्तत्रमेभ्यःप्रागभावव्यक्तः मध्येचाव्यक्तः मध्येनम्यव्यक्तताविकारइति प्रस्तुतविकारेशोचनीये
नस्वभावे किंच यत्रनत्वलकारणेकिंचिदभिमतेतत्रेवयथाक्रमविविक्तस्वभावतयास्वात्मनमध्यदर्शिनतत्त
दनंतरंहिस्थितिसहतिर्वचिरोनित्यमेव तस्मात्स्वभावेनिकस्यशोच्यता २८ एवंविधेच आश्चर्यवत्पश्यतिक
श्चिदेनमाश्चर्यवद्वदतितथैवचान्यः आश्चर्यवच्चैनमन्यःशृणोतिश्रुत्वाप्येनंवेदनचैवकश्चित् ननुयद्येवमय
मात्माविनाशीकिमिति सर्वेजनास्तत्त्वेनोपलभन्ते यतोद्भुतवत्कश्चिदेवपश्यति श्रुत्वापिनकश्चिदेवजाना
ति नवेत्ति २९ देहीनित्यमवध्योयंदेहेसर्वस्यभारत तस्मात्सर्वाणिभूतानिनत्वंशोचितुमर्हसि अतोनित्यमात्म

नोविनाशिनम् ३० स्वधर्ममपिचावेक्ष्य नविकम्पितुमर्हसि धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्य नविद्यते स्व
धर्मस्यचाः नपहार्यत्वाद्युद्धविषयः कम्पोनयुक्तः ३१ यदृच्छयाचोपपन्नं स्वर्गद्वारमपावृतम् सुखिनः क्षत्रियाः
पार्थलभन्तेयुद्धमीदृशम् अप्रार्थितेपिकाममयाः क्षत्रियास्तेरपीदृशंयुद्धंस्वर्गहेतुत्वान्नाम्नाजे किंपुनर्यस्येदृशो
ज्ञानमुपदिष्टमितितात्पर्यम् नयुनःस्वर्गपर्यवसायी श्लोकः ३२ यद्वयाच्चभवाम्बहुमानिवत्तैनततदेवशतनशास्त्रु
पनिपतिष्यतिभवतस्माद्व अथचेत्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसि ततःस्वधर्मंकीर्तिंचहित्वापापमवाप्स्यसि
अकीर्तिंचापिभूतानिकथयिष्यन्तितेव्ययां संभावितस्यचाकीर्तिर्मरणादतिरिच्यते भयाद्रणादुपरतंमंस्यन्ते
त्वांमहारथाः येषांचत्वंबहुमतोभूत्वायास्यसिलाघवम् अवाच्यवादांश्चबहून्वदिष्यन्तितवाहिताः निंदन्त
स्तवसामर्थ्यंततोदुःखतरंनुकिं हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीम् तस्मादुत्तिष्ठकौन्तेययुद्धायकृ
तनिश्चयः श्लोकपंचकमिदमभ्युपगम्यवादद्रूपमुच्यते यदिलौकिकेनव्यवहारेणास्लभवांस्तथाप्येवंशया
युक्तमेतत् ३७ सुखदुःखेसमेकृत्वालाभालाभौजयाजयौ ततोयुद्धाययुज्यस्वनैवंपापमवाप्स्यसि नवत्तस्व
धर्मतयैवकर्माणिकुर्वतोनकदाचित्पापसंबंधः ३८ एषातेभिहितासांख्येबुद्धियोगेत्विमांशृणु बुद्ध्यायुक्तोयया
पार्थकर्मबंधंप्रहास्यसि एषावत्तवसांख्येसम्यग्ज्ञानेबुद्धिर्निश्चयात्मिकोक्ता एषैववचयथायोगकर्मकौश

लेयुक्तोनैनत्थैवस्थाण यथाबुद्ध्याकर्मणांबंधकत्वंमहासि नहिकर्माणिस्वयंबध्नंतिजडत्वात् अतःस्वयमा
त्माकर्मभिर्वासनात्मकैरात्मानंबध्नाति ३९ नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते स्वल्पमप्यस्यधर्मस्यत्रा
यतेमहतोभयात् अस्यांबुद्धावभिक्रमेणप्रारब्धेनप्रमादेननाशोनभवतिप्रमादस्याभावात् यथाचपरिमितेन।
श्रीखंडकेनज्वालायमानोपितैलकटाहःसद्यःशीतीभवति एवमनयास्वल्पयापियोगबुद्ध्यामहाभयंसंसा
ररूपंविनश्यति ४० नचैषाबुद्धिःसर्वेषांजायतेकिंतर्हि व्यवसायात्मिकाबुद्धिरेकैवकुरुनंदन बहुशाखाह्यनंता
श्चबुद्धयोव्यवसायिनां व्यवसायात्मिकासर्वविषयेकैवसहजार्थाः निश्चितव्यवसायात्वबहुत्वंगच्छति ४१ तथा।
च यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः वेदवादरताःपार्थनान्यदस्तीतिवादिनः कामात्मानःस्वर्गपरा
जन्मकर्मफलेप्सवः क्रियाविशेषबहुलांभोगैश्वर्यगतीःप्रति भोगैश्वर्यप्रसक्तानांतयापहृतचेतसाम् व्य
वसायात्मिकाबुद्धिःसमाधौनविधीयते येकामाभिलाषिणस्तस्वयमेतांवाचंवेदात्मिकांपुष्पितांभविष्यत्स्व
र्गफलेनप्यामोवदंति अतएवजन्मनःकर्मैवफलमिच्छंतिनेप्रविपश्चितः नेचतत्त्वेवस्वयंकल्पितयावेदवा।
चापहृतचित्तानांव्यवसायबुद्धिर्ज्ञानंपिनसमाधियोग्याः तत्रफलनिष्फल्यतादितिश्लोकत्रयस्यतात्पर्यम् अडप
वव त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुन निर्द्वंद्वोनित्यसत्त्वस्थोनिर्योगक्षेमआत्मवान् वेदास्त्रैगुण्यनक

गी॰
टी॰
८
8

ण्येन विशेषेणास्मिन्वेति विधेति नन्वेवं वेधकाः यस्मान्नत्वेवद्वः त्वमोस्तुस्त्राः कर्माणि वैदिकानि त्रियमाणानि
वेधकानि अतस्त्रैगुण्येकामरूपेमाऽऽज्ये यदिति वेदद्वयेणापरमेतदभविष्यास्वहूनेतेगुह्यकरणेष्वचरिष्यन वे
दास्य स्वधर्मनिष्पादकत्वाभावात् येषां तु फलाभिलाषो विगलितस्तेषां न वेदा वेधकाः ४५ यतो वेदाः
परैतेषां सम्यग्ज्ञानोपयोगिनः अत एवाह यावानर्थ उदपाने सर्वतः संप्लुतोदके तावान्सर्वेषु वेदेषु ब्राह्मण
स्य विजानतः यस्य स्वधर्मसाध्येज्ञाने च प्राधान्ये परिमितादपि वेदभाषितान्नैकार्यम् ४६ अतस्त्वं कर्मण्येवा
धिकारस्ते मा फलेषु कदाचन मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि कर्ममात्रे ते व्यापृतो भवतु न कर्मफ
लेषु न तु कर्मणि कृते नान्तरीयकतयैव फलमापतति मैवं न तु हि यद्धितं फलकामनाकालुष्यं मा भव
सि नरा कर्मणां फलप्रतिहेतवे यस्याकामानेफलेज्ञानेनानिष्कोऽस्तु दितिकर्माभावेन यः संगः स एव गाढ
गृहद्रूपो मिथ्याज्ञानस्वरूपस्तं मा जप एव ४७ किं तर्हि योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय सिद्ध्य
सिद्ध्योः समो भूत्वा समत्वं योग उच्यते यस्य सर्वे समारम्भाः कामसंनिराशीर्बन्धनाच्छिद त्यागे यस्य हुतं सर्वं सा
त्यागी स च बुद्धिमान् योगः स्थिरता कर्मणा कृत साम्यं च योगः यस्य सर्वे इति यस्य सर्वे व्यापाराः आशीरूपेणेव।
बंधेन न युक्ताः अभिलाषा हि बंधकः ४८ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय बुद्धौ शरणमन्विच्छ कृपणा ः

फलहेतवः बुद्धियोगात्किलहेतोरवरेइष्टफलेऽनिष्टंकर्मेहनीभवति अतस्त्वाहस्यात्तुद्धौशरणमन्विच्छ पार्थ
यत्नयेनस्यात्तुद्धिलेभ्यने ४९ बुद्धियुक्तोजहातीहउभेसुकृतदुःकृते तस्माद्योगाययुज्यस्वयोगःकर्मसुकौशले
उभेइतिपरस्परव्यभिचारेदर्शयतितस्मात् यथाहिसुकृतदुःकृतेनशपतस्तथा करणमेवपरमंकौशलमि
तिभावः ५० कर्मजंबुद्धियुक्ताहिफलंत्यक्त्वामनीषिणः जन्मबन्धविनिर्मुक्ताःपदंगच्छन्त्यनामयं योगबुद्धि
युक्ताःकर्मणांफलंत्यक्त्वाजन्मबन्धंभजन्तिब्रह्मसन्नामवाप्नुवन्ति ५१ यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति त
दागन्तासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच श्रुतिविप्रतिपन्नातेयदास्थास्यतिनिश्चला समाधावचलाबुद्धिस्तदायो
गमवाप्स्यसि तत्रचयोगबुद्धिप्राप्त्यवसरेनचस्फुटमेवेदमभिज्ञानेश्रोतव्यस्यश्रुतस्याभिलष्यमानस्यागमस्यो
भयस्यापिनिर्वेदंभाक्तम् अनेनचेदंशुक्रम् अविद्यापदनिपतितस्मावत्तुग्राहकशास्त्रश्रवणसंस्कारविमले
ममहिमाये यत्नवास्थानेऽकलत्यादिदोषदर्शनमतन्तनश्यास्यासनवहुमानविगलनेविगलिष्यतीति ५२
अर्जुनः स्थितप्रज्ञस्यकाभाषासमाधिस्थस्यकेशव स्थितधीःकिंप्रभाषेतकिमासीतव्रजेतकिं यदास्था
स्यतिबुद्धिरित्यनेनवचसासमाधिस्थस्ययोगिनोयःस्थितप्रज्ञशब्दस्तत्रवाचकउक्तस्यकाभाषाकिंप्रवृत्ति
निमित्ते भाष्यनेयननिमित्तेनशब्देरथ्यइतिकृत्वा योगिनःस्थितप्रज्ञाशब्दःकिंरूपावाचकोन्वकृतनयावेशे

कः प्रश्नः यद्यपि द्वितीये शके च नास्ति तथाप्यनुवर्थतो लक्षणमपि स्वरूपलक्षणनिमित्तनिरूपणेन स्फुटीकर्त्त
मेघप्रश्नः स्थिरधीरितिशब्दपदार्थं कोऽर्थः पदार्थकस्य तत्र स्थिरधीशब्दः किं यथा लक्षणमवाच्यमाह आ
होतपस्विनमपीति द्वितीयः प्रश्नः स च स्थिरधीर्योगी किं भाषीत किमभ्यसेत् क्वाभ्यस्येयेष्यादिति तृतीयः प्र
श्नः स च किमाप्नुयादिति चतुर्थः ५४ एतेषु प्रश्नचतुष्टये क्रमेण निर्णीयते श्रीभगवता प्रजहाति यदा कामा
न्सर्वान्पार्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते स्थितानुष्ठानप्रज्ञायस्य बुद्धिस्वनिसमात्मबु
द्धिर्वसति विषयविक्षेपकृतस्य कामरूपस्य भ्रमस्य निहननात् योगिनो यः स्थितप्रज्ञाशब्दान्वयः स चेष्टगुरू
ह्मेकः प्रश्नो निर्णीतः ५५ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थिरधीर्मुनिरु
च्यते सुखदुःखयोर्यस्य रागद्वेषरहिता हृत्तिः स मुनिरेव स्थिरप्रज्ञो नाम ५६ युक्तश्चैतेन यतः यः सर्वत्रा
नभिस्नेहस्तत्तत्प्राप्य शुभाशुभं नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता शुभाशुभप्राप्तौ तस्माद्धर्षादिना योना
भवतः ५७ यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः इंद्रियाणीन्द्रियार्थेभ्यः स्थिरप्रज्ञस्तदोच्यते न चासम्पा
चकवद्योगबुद्धिते यदा यदा किलायमिन्द्रियाणि संहरते आत्मन्येव कूर्मोऽङ्गानि क्रोडीकरोति विषये
भ्यो विषयान्निवार्य तदा तदा स्थिरप्रज्ञः यैरिंद्रियार्थेभ्यः प्रभृतिरिन्द्रियाणामात्मनि संहरते विषयेंद्रियादिके

सर्वमात्मसात्कुरुते ५८ ननु तपस्विनोपि कथं स्थिरप्रज्ञशब्देन प्रवर्त्तते उच्यते विषयाविनिवर्त्तन्ते निराहा
रस्येंद्रिनः रसवर्ज्जं रसोप्यस्य परं दृष्ट्वा निवर्त्तते यद्यप्याहारार्थैरुपादिभिर्विषयैः संवेद्योस्य नास्ति तथापि तस्य वि
षयाश्रेत स्कुरणगतमुपरागलक्षणं रसवर्ज्जयित्वा निवर्त्तन्ते तेनासौ स्थिरप्रज्ञः रसे केचिदास्वादं मधुरादिक
माहुः योगिनस्तु परमेश्वरदर्शनादुपरागो न भवति अन्यस्य तु तपस्विनो नासौ निवर्त्तते ५९ यततो ह्यपि हि कौं
तेय पुरुषस्य विपश्चितः इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः यद्यस्मात्प्रयत्नं कुर्वतोपि तपस्विनो मनइंद्रियैर्ह्रियते अ
थवा यत्नस्य प्रयत्नवतोपि योगिनाचमनपवर्ज्जनवामिति द्वितीयो निर्णीतः ६० तानि सर्वाणि संयम्य युक्त आसीत म
त्परः वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता यद्येवं मनसेंद्रियाणि नियमयति तत्रप्रमत्तः स एव स्थिरप्रज्ञः
स च मत्परएवासीत मामेव चिदात्मानं परमेश्वरमभ्यसेत् ६१ ध्यायतो विषयान्पुंसः संगस्तेषूपजायते संगात्सं
जायते कामः कामात्क्रोधोभिजायते क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशो
बुद्धिनाशात्प्रणश्यति तपस्विनो विषयमार्गएव विषयग्रहणे पर्यवस्यति ध्यानादित्यनेन ध्यानकालएव
संगादयउपजायंते इत्यनुपायो विषयः सागः स्थितप्रज्ञस्य ६२ रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् आ
त्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति प्रसादे सर्वदुःखानां हानिरस्योपजायते प्रसन्नचेतसो ह्याशु बुद्धिः पर्य

गी॰
ह॰ ९
10

वतिष्ठते नास्तिबुद्धिरयुक्तस्यनचायुक्तस्यभावना नचाभावयतःशांतिरशांतस्यकुतःसुखं इंद्रियाणांहिचर
तांयन्मनोनुविधीयते तदस्यहरतिप्रज्ञांवायुर्नावमिवांभसि तस्माद्यस्यमहाबाहोनिगृहीतानिसर्वशः इंद्रि
याणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता यस्तुमनसोनियामकःसविषयान्सेवमानोपिनक्रोधादिकल्लोलैरभि
भूयतेइतिसएवस्थितप्रज्ञोयोगीतितात्पर्यम् ६८ योगीचसर्वव्यवहारांकुर्वाणोपिलोकोत्तरइतिनिरूपयता
परमेश्वरेणासेतिष्यासस्वरूपेकथ्यते यानिशासर्वभूतानांतस्यांजागर्तिसंयमी यस्यांजाग्रतिभूतानिसारात्रिः
पश्यतोमुनेः यासर्वेषांभूतानांनिशामोहिनीमाया तस्यांमुनिर्जागर्तिकथं इयंहेयेति यस्यांचदर्शयालो
कोजागर्तिनानाविधांचेष्टांकुरुतेसामुनेरात्रिः यतोसौव्यवहारेप्यसंबुद्धः एतदुक्तंभवति येयंमायाखलु
तस्यामोहकत्वेनामस्वरूपेस्वरवतेचनाभासतेचतत्रलोकः मांचस्वरूपमस्याप्रपरामृष्टैवद्वितीयस्मिरूपेनिव
दूरस्तनिरास्ते योगीतुतद्विपरीतः तदीयेमोहकत्वेनतुन्मूलनायप्रवृत्तिस्वरवेनुवर्ततेनत्वादियते एवंपश्य
त्मानी मिथ्याज्ञानोपयातामुस्वखतेचनानादरः एवंभूतएवसाधुविविधिविदित्र ६९ अतएव आपूर्यमा
णमचलप्रतिष्ठंसमुद्रमापःप्रविशंतियद्वत् तद्वत्कामायंप्रविशंतिसर्वेसशांतिमाप्नोतिनकामकामी यो
गीनकामार्थंव्यवहरोवति अपितिंद्रियथर्मैतयाते विषयाभ्यप्रविशंतोनतरंगयेतिनदीवेगाइवोदधिम् एवं

त्तीयोनिर्लीनः ७१ विहायकामान्यःसर्वान्पुमांश्चरतिनिःस्पृहः निर्ममोनिरहंकारःसशांतिमधिगच्छति सयो
गीसर्वकामसंन्यासितात्त्वोनिरूपमोक्षमेति ७२ एषाब्राह्मीस्थितिःपार्थनैनांप्राप्यविमुह्यति स्थित्वास्यामंतका
लेपिब्रह्मनिर्वाणमृच्छति एषासौब्रह्मसमाधस्यांतःकरणमात्रेस्थित्वावस्थितिंप्राप्यशरीरभेदात्परमेब्रह्मणिमोक्षो
त्ममभवत्त्वहृदयेनिर्गलितमितिशिवम् अत्रार्थसंग्रहः अहोनुचेतसन्निद्रागतिस्त्यागेनयत्किल अशेषमेवविष
यांश्रयंस्त्वात्परिमार्जनं इतिश्रीभगवद्गीतार्थसंग्रहेद्वितीयोध्यायः २ अर्जुनउवाच ॐ ज्यायसीचेत्कर्मणस्ते
मताबुद्धिर्जनार्दन तत्किंकर्मणिघोरेमांनियोजयसिकेशव व्यामिश्रेणेववाक्येनबुद्धिंमोहयसीवमे तदेकंव
दनिश्चित्ययेनश्रेयोहमाप्नुयाम् कर्मापेक्षयाज्ञानंचेत्तवबुद्धियोगार्थामयुक्तंरूपितज्ञानस्य तद्बलेनरूपणीयत्वेय
दिकर्मणो बुद्धियुक्तोजहातीहेमइत्यादिनयेनमूलतएवतत्कर्मणाकिंप्रयोजनमितिप्रश्नाभिप्रायः १ श्री
भगवांस्तत्रोद्दलति लोकेस्मिन्द्विविधानिष्ठापुराप्रोक्तामयानघ ज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनां
लोकएषाद्वयोगतिःप्रसिद्धाः सांख्यानांज्ञानेप्रधानेयोगिनांचकर्मेति मयातुसैकैवनिष्ठाकाज्ञानक्रियामय
त्वात्संविभक्तेतिभावः ३ नकर्मणामनारम्भान्नैष्कर्म्यंपुरुषोश्नुते नचसंन्यसनादेवसिद्धिंसमधिगच्छति नहि
कश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत् कार्यतेह्यवशःकर्मःसर्वःप्रकृतिजैर्गुणैः ज्ञानंकर्मणारहितंनभवति

कर्मचकौशलोपेतेज्ञानरहितेनभवति एवंकर्मैववस्तुज्ञानकर्मणी तथापिवाक्ये नक्रियारहितेज्ञानेनज्ञानरहिता
क्रिया ज्ञानक्रियाविनिघ्नग्रआचार्यैः पशुपापाशुरेति तस्माज्ज्ञानेनिवर्तितकर्मापरिहार्य्ये यतः परवशएवकायवा
मनसोपरिस्पंदात्मकत्वादवश्यंएकिंचित्करोति ५ कर्मेंद्रियाणिसंयम्ययआस्तेमनसास्मरन् इंद्रियार्थान्विमूढा
त्मामिथ्याचारःसउच्यते कर्मेंद्रियैर्नकरोतिअवश्यंमनसावतत्करोति अस्ततस्मन्मिथ्याचारः मानसानां
कर्मणाममनतमपरिहार्यत्वात् ६ यस्त्विंद्रियाणिमनसानियम्यारभतेर्जुनः कर्मेंद्रियैः कर्मयोगमसक्तः सवि
शिष्यते कर्मसुक्रियमाणेषुनज्ञानहानिः मनसोव्यापारेयेन्प्रशस्तएवकर्मणः क्रियमाणत्वात् ७ अतः निय
तंकुरुकर्मत्वंकर्मज्यायोह्यकर्मणः शरीरयात्रापिचतेनप्रसिद्ध्येदकर्मणः नियतेशास्त्रीयेकर्मकुरु शरीरयात्रा
मात्रस्यापिकर्मणाधीनत्वात् ८ यतः यज्ञार्थात्कर्मणोन्यत्रलोकोयंकर्मबंधनः तदर्थंकर्मकौंतेयमुक्तसंगः
समाचरः यज्ञार्थादवश्यकरणीयाद्यान्यानिकर्माणिबंधकानि अवश्यकर्तव्येषुमुक्तफलसंगतयाक्रियमाणेन
फलदम् ९ सहयज्ञाः प्रजाः सृष्ट्वापुरोवाचप्रजापतिः अनेनप्रसविष्यध्वमेषवोस्त्विष्टकामधुक् प्रजापति
परमात्माप्रजाःसदेवकर्मभिःससर्जपुरोवाचतेनप्रजानां कर्मभ्यएवप्रसवःसंतानः एतान्येवचेष्टंसंसारमोक्षौ
वाञ्छति संगात्संसारेमुक्तसंगत्वान्मोक्षे यद्येषांमोक्षमाथात्मनेरेवविषयाः सेव्यास्युरुच्यते १० देवान्भावय

तानेनतेदेवाभावयंतुवः परस्परंभावयंतःश्रेयःपरमःवाप्स्यथ देवाःक्रीडनशीलाइंद्रियवृत्तयःकरणेश्वर्यो
देवतारहस्यशास्त्रप्रसिद्धाः नाश्येनेनकर्मणानर्पयत यथास्वंभवेविषयान्भक्षयंतेनमर्थः तृप्ताश्चसमस्तेवोयुष्मा
नात्मनएवस्वरूपमात्रेचिंतानपवर्गाभावयेत स्वात्मस्थितियोगप्रदानात् एवमन्यवर्त्तेतुर्ष्यानसमाधिसमयपरेप
रामिंद्रियतर्पणात्स्वात्मसाक्षात्कारलक्षणपरस्परभावेनसतिशीघ्रमेवपरमंश्रेयःपरस्परंभावेनसतिशीघ्रमेव,८
विगलनलक्षणंब्रह्मप्राप्स्यथ ११ नकेवलमिन्द्रसुमपवर्गयावत्सिद्धिलाभेपिश्रेयःमार्गइत्याह इष्टान्कामान्हिवो
देवादास्यंतेयज्ञभाविताः तैर्दत्तानप्रदायैभ्योयोभुंक्तेस्तेनएवसः यज्ञतर्पितानीन्द्रियाणिस्थितिर्वर्धंतियत्रका
पिधेयादाविति अतएवतद्व्यापारेसतितेषांविषयाणांस्फूर्त्तिसंकल्पध्यानादिनाभावादिविषयाइंद्रियैरेवद
त्तायदितेषामेवोपभोगायनदीयतेतर्हिस्तेनएवचौर्यस्यात् कर्मप्रवृत्तिस्मात उक्तंहिएवमेवभगवता मि
थ्याचारःसउच्यतेइति अतोयेवाक्यार्थः यःस्वैवपायेसिद्धिमपवर्गवाप्रप्तालितेनेंद्रियकौतुकनिर्हत्ति मा
त्रफलतयैवभोगायस्थापनतमात्मेतुकाइति १२ यज्ञशिष्टाशिनःसंतोमुच्यंतेसर्वकिल्बिषैः भुंजतेतेत्वघंपापाये
पचंत्यात्मकारणात् अवश्यकर्त्तव्यताइपशासनमहिमायानाभोगामेश्रेति अवातद्व्यापारमात्रतयानपवच
इष्टवफलनाभावोगतयाश्रयेन्द्रियात्मकदेवगणतर्पणलक्षणयज्ञादवशिष्टमतःसारभूतात्मस्थिमानो

गी॰
ऋे॰ प्र
१२
12

दनस्तेण विघ्नसंघेषेश्वेतितनचात्रुप्तमवेति तदुपायेयोपायतयानुविषयभोगवाङ्क्तिनेसर्वकिल्बिषैःशुभाशु
भैर्मुच्यन्ते येनात्मकारणादिस्वविद्यावशात्स्वलमेवविषयभोगपरास्तेनमन्वानाआत्मार्थमिदंवयंकुर्मइतिकुर्व
न्ते तपवाचेशुभाशुभात्मकंलभन्ते १३ अन्नाद्भवन्तिभूतानिपर्जन्यादन्नसंभवः यज्ञाद्भवतिपर्जन्योयज्ञःकर्मसमु
द्भवः यज्ञाद्भवतिपर्जन्योयज्ञःकर्मसमुद्भवः कर्मब्रह्मोद्भवंविद्धिब्रह्माक्षरसमुद्भवं तस्मात्सर्वगतेब्रह्मनित्यो
यज्ञेप्रतिष्ठितं अन्नादेर्विभागभोगस्वभावात्कथंविनामायाविद्याप्रकृतिकालाद्यनेकापरपर्यायाद्भूतानिवि
विज्ञानानिभवन्तितत्त्वान्येवपर्जन्यादविकिञ्चनसेवितस्वभावादात्मनः भोक्तृत्वेऽपिसुलाभलाभयोग्यतायाः सचपर्जन्यो
भोक्तायज्ञाद्योगक्रियायत्तमाश्रितवस्तुभोगक्रियाचकर्मणः क्रियाशक्तिमत्त्वेनप्रवर्तनात् नचसानियमवि
शिष्टेनमप्यनवच्छिन्नानेनमानेनअपरोसमुत्कुलमहेश्वरभावपरमात्मब्रह्मसंस्पर्शावशात् तच्चाङ्कुलदा
क्षानाङ्क्षादिनैश्वर्यैवब्रह्मप्रवृत्तात्मवशानाशेषैश्वर्यन्तरंगात्तस्यैविन्मायात् इत्येवेस्वब्रह्मस्थितानायेयज्ञःषडेव
केवादयन् इत्वतावयमेधानादपवर्गं अपात्रयतेब्रह्माध्यवहारमात्रत्वयतीतिविद्याविद्यात्मामृतरंगब्रह्म
गंब्रह्मयज्ञेएवप्रतिष्ठितम् अन्नेतदन्नेनावद्दीयेलोहितकर्मणाभूतकारणे अन्नेचवृष्टिद्वारेणपर्जन्यात् सा
पागैवात्मालाहूतिसम्पत्तिमादितिमेति ततोवृष्टिर्यज्ञात् यज्ञःक्रियातः साचज्ञानपूर्विकाज्ञानमवतारीति।

अपरेतत्र प्रवर्त्तमाने विषयपंचकमाश्रित्य भूतानींद्रियाणि विषयास्वात्मनः स्फुरितरूपां अतश्चात्मैव विष
योपभोगेन पोष्यते अतश्च सर्वगतं ब्रह्मकर्मणि प्रतिष्ठितं तत्प्रयत्नात्स्य १५ एवं प्रवर्तितं चक्रं नानुवर्तयतीह
यः अघायुरिंद्रियारामो मोघं पार्थ स जीवति १६ यस्त्वेवं नांगीकरोति स पापमयः अंतःस्थइंद्रियेषु वर्तमानस्तन्नात्मनि
१६ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते १७ नैव तस्य कृतेनार्थो ना
कृतेनेह कश्चन न चास्य सर्वभूतेषु किश्चिदर्थव्यपाश्रयः १८ तस्मादसक्तः सततं कार्यं कर्म समाचर असक्तो
ह्याचरन्कर्म परमाप्नोति पूरुषः १९ कर्मणैव हि संसिद्धिमास्थिता जनकादयः लोकसंग्रहमेवापि संपश्यन्
कर्तुमर्हसि २० यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते २१ न मे पार्थास्ति क
र्तव्यं त्रिषु लोकेषु किंचन नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि २२ यदि ह्यहं न वर्तेयं जातु कर्मण्यतंद्रितः मम
वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः २३ उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं संकरस्य च कर्ता स्यामुपहन्या
मिमाः प्रजाः २४ सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं २५ आ
त्मरतेस्तु कर्मेंद्रियव्यापारं तैरेव कुर्वतः करणाकरणेषु सममता अतएव नास्य भूतेषु किंचिदात्मप्रयोजनम
पेक्षितं यदा तु यदंगीकरोति अपि तु करणीयमिदमिमतावता न तत्र कुर्वतामपि सिद्धो जनकादयो दृष्टांताः ॥ १८

१६

मामपापणीयस्यपविहृणिमनसोपिकर्मप्रवृत्तौलोकसंग्रहः २४ प्रयोजनमितिमत्वा श्रीभगवानात्मानमेवदृष्टान्ती
करोति॥ तस्मादस्मकृत्पवकरणीयंकर्मकुर्यात् किंच विद्वितवेद्यः कर्मचेत्त्यजेत २२ नलोकानांबुद्धिभेदएवेक
प्रसिद्धएव शिथिलिश्यास्थावेयत्तेनाप्रबुद्धिलक्षणोजायेत २३ यतःकर्मवासनाचनमोक्तुंशक्नुवंतिज्ञान
द्वारेचनाश्रयितेप्रसवशिथिलीभवति २४ यतस्तेनसम्यग्ज्ञानेनसस्ताःप्रनेबुद्धिभेदंविगालनेनेचापरमोचमन
श्रसमबुद्धयज्ञायभेदयेनयियमेषां २५ तदाह नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनां जोषयेत्सर्वकर्माणिवि
द्वान्युक्तःसमाचरन् २६ स्वयंचैवंयुक्तमानःकर्माणिकुर्यात् नचलोकानांबुद्धिंभिन्द्यात् २६ अज्ञानेभिव
क्तैतदज्ञानंदर्शयति॥ प्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः अहंकारविमूढात्माकर्ताहमिति
मन्यते २७॥ प्रकृतिसत्त्वविधिभिर्गुणैःसत्त्वाद्यैःकिलकर्माणिक्रियन्ते तान्यहंकर्तेतिअध्यवसायमिथ्योवा
त्मानेवभाति २७ तत्त्ववित्तुमहाबाहोगुणकर्मविभागयोः गुणागुणेषुवर्तन्तइतिमत्वानसज्जते २८ गुण
कर्मविभागतत्त्ववित्तुप्रकृतिःकरोतिममकिमायातमितिमात्मानंमोचयति २८ कर्मसंगिनामित्युक्तं कर्म
संगिनंदर्शयति॥ प्रकृतेर्गुणसंमूढाःसज्जन्तेगुणकर्मसु तानकृत्स्नविदोमंदान्कृत्स्नविन्नविचालयेत् २९
प्रकृतिसत्त्वविधिभिर्गुणैःसत्त्वाद्यैःकृतेषुकर्मसुसंमूढाःसज्जन्तिसत्त्वादिगुणमयदात्मानं २९ तस्माद्युक्तःसन्ज्ञ

येन कर्माणि त्यक्ष्ये तत्र कथमिति स्फुटयति मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा निराशीर्निर्म
मो भूत्वा युध्यस्व विगतज्वरः मयि सर्वाणि कर्माणि नाहं कर्तेति संन्यस्य स्वतंत्रः परमेश्वर एव कर्ता नाहं कश्चि
दिति निश्चित्य लोकानुग्रहं चिकीर्षुर्लोकाचारशुद्धात्मकमनुतिष्ठ ३० ये मे मतमिदं नित्यमनुवर्तन्ति मानवाः
श्रद्धावंतोनसूयंतो मुच्यन्ते तेपि कर्मभिः येनेत्वभ्यसूयंतो नानुवर्तन्ति मे मतं सर्वज्ञानविमूढांस्तान्विद्धि न
ष्टानचेतसः एतस्य मतमाश्रित्य यः कश्चिद्यत्किंचित्करोति न तस्यानर्थ एवं एतस्मिन्नज्ञाने येन अश्रद्धालवस्ते
विनष्टा अविरतं जन्ममरणादिभाविनात् ३२ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि प्रकृतिं यान्ति भूतानि नि
ग्रहः किं करिष्यति ॥ योपि वज्ञानी न तस्य चेत्स्वदारे भोजनादौ विपर्यासः कश्चित् अपि तु सोपि स्वभावानुचितमे
व चेष्टते एवमेव जानन् यतो भूतानां पृथिव्यादीनां प्रकृतौ विलयः आत्मा चाकर्ता निर्मुक्त इति कस्य
जन्मादिनिग्रहः ३३ कथं तर्हि वेद इत्युच्यते ॥ इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ तयोर्न वशमागा
च्छेत्तौ ह्यस्य परिपंथिनौ ३४ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् स्वधर्मे निधनं श्रेयः परधर्मो दयादपि सं
सारी च प्रति विषये रागद्वेषं च गृह्णाति यतः कर्माण्यात्मकर्तृकाण्येव विमूढत्वादभिमन्यते इति सम्यक्सौपि
भोजनादिष्वव्यवहारं कुर्वन्तो ज्ञानिसमानिणोरस्त्यय विशेषः अयं निसिद्धान्तः ३५ सर्वथा मुक्तसंगस्य स्वधर्म एवाति

गी॰
से॰ अ
२५
14

णोवास्तिकश्चित्तु एषपापात्मकोवायः स्वधर्मोहिदुःखदायकत्वेनपापीयान्समस्तनिवृत्त्यएव ननेनकश्चिद्विधि
मेनजनतनीयतेइतिभावः ३५ अर्जुनः अथकेनप्रयुक्तोयंपापंचरतिपूरुषः अनिच्छन्नपिवार्ष्णेयबलादि
वनियोजितः पापस्यापनयाविदन्नपिजनकथंतत्रप्रवर्ततेइतिप्रश्नः अस्यप्रश्नस्यार्थोनेयमाशयः स्वध
र्मोयदिस्याद्दुःखदायकत्वेनपायिनात्मधर्मः कथंनत्रियधर्मोवरणमेषामिति कोयंस्वधर्मोनामयेनात्रतिरिक्तो
मेतद्विमुक्तोभवति ३६ अत्रोत्तरंसमपिधर्मेहृदिस्थोपरागतस्कावरणंकृतोयंविमलवानन्ततन्दभावकृतनरमा
प्रायेन श्रीभगवानुवाच कामएषक्रोधएषरजोगुणसमुद्भवः महाशनोमहापाप्माविद्ध्येनमिहवैरिणं ३७
धूमेनाव्रियतेवह्निर्यथादर्शोमलेनच यथोल्बेनावृतोगर्भस्तथातेनेदमावृतं ३८ आवृतंज्ञानमेतेनज्ञानिनो
नित्यवैरिणा कामरूपेणकौन्तेयदुःपूरेणानलेनच यथोल्बेनावृतोगर्भः ३ ज्ञाभ्यामेनज्ञाभ्यामन
योरेतत्तवैषम्योहत्वात्वं एतौचकामक्रोधौनित्यसत्वेपिनावयोमाविनाभावेनवर्तेतेइत्येककृपुतयेवव्या
चष्टे एषचमहस्रसरवसाशनोयामकरः महतः पापस्यहेतुत्वाच्चक्रोधएवपापदात्री एनंवैरिणमा
त्मोजानीयात् ३ नत्वर्थाशुपचात्केज्ञानस्वरूपेचवस्तुदोषेस्मशाकेभवेदित्यभिप्रायेणार्जुनउवाच भ
वमेषकथंलक्ष्यकयंचैवविवर्धते किमात्मकःकिमाचारस्तन्ममसाचक्ष्वपृच्छतः अस्यचोत्तरं किंका

रणेवर्धनेचकोहेतुः सद्रूपेणास्यकीदृक् उत्पत्तेर्हेतुभूतस्य किमात्मः वर्तति किंकरोतीति प्रश्नः ॥ अथो
नेरे श्रीभगवानुवाच एषसूक्ष्मः परः शत्रुर्देहिनामिन्द्रियैः सह सुखतन्त्र इवासीनो मोहयन्पार्थ तिष्ठति कें
मक्रोधमयो घोरः स्तम्भहर्षसमुद्भवः अहंकाराभिमानात्मा दुस्तरः पापकर्मभिः हर्षमस्य निवर्तयैष शो
कमस्य ददाति च भयं चास्य करोत्येष मोहयंस्तु मुहुर्मुहुः स एष कलुषः क्षुद्रश्छिद्रप्रेक्षी धनंजय रजः
प्रवृत्तो मोहात्मा मानुषाणामुपद्रवः एषतावत्सूक्ष्मत्वमतिसमये लत्त्वा इन्द्रियेषु एवं च वर्तमान सर्वे तेष
यितुमिवेत्यधुने वचनस्य दुःखमोदमयस्य मस्तात् अतएव मोहयन् कामेति लवः क्रलाद्यभिमा
नस्तत्क्रतोयोद्भवः अहंमोहधरइति अतएवाह अहंकारइति उक्त एव गर्वो हर्षं तेभिमानस्वभावः सर्व
बुद्धिप्रकारेणाव जायते इत्यन्वयः अस्मात् परिहृताः स एष इति छिद्राणि प्रेक्षते अमताद्विद्वेशणा येहा
लोकपरलोकौ नाशयामीति तथा च मोक्षधर्मेषु यत्क्रोधने यजते यद्ददाति यद्वा तपस्तप्यते यज्जुहोति
वैवस्वतस्तद्धरते स्य सर्वं मोघः श्रमो भवति क्रोधनस्येति रजसः प्रवृत्तत्वमोहात्मपदस्य अर्थः दृष्टान्तत्रयेणाद्र
पसर्पनमः कार्यकरणजुगुप्सा स्वदेनवाक्ये अयमिमात्मा कामरूपः क्रोधो यत्नस्थ इति अनलेन वा निना
नैवसर्वयितुम शक्येन दृष्टान्तदृष्टयदाहनात ॥ अस्य निवारणोपायमाह इन्द्रियाणि मनो बुद्धिरस्या

गी॰
सं॰ अ॰
२५
15

यिष्ठानमुच्यते एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनं ४० तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ पाप्मानं प्रज
हिह्येनं ज्ञानविज्ञाननाशनम् ४१ आदाविंद्रियेषु सत्सु तिष्ठति यथावत्सश्चाशाश्वई हिं इंद्रियप्रदेश एव क्रोधमात्म
नोज्जनयति ततो मनसि संकल्पे ततो बुद्धौ निश्चये एतद्द्वारेण मोहं जनयन् ज्ञानं नाशयति ४१ तस्मादादाविंद्रि
याणि नियम्य क्रोधादिकमिंद्रियेषु प्रथमेनारहणायात् ज्ञानं ब्रह्मविज्ञानं च भगवन्मयीं क्रियां नाशयति हि
यतः अतः पाप्मानं क्रोधं त्यज अथवा ज्ञानेन मनसा विज्ञानेन बुद्ध्या नाशनेवारणे क्तमेति क्रियाविशेषणं
इंद्रियेषु मनसि संकल्पनरहणायात्मकल्पितेवानवित्थिमयादिति नामर्थम् ४१ अत्र युक्तिः श्लोकद्वयेना
ह इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्बुद्धेः परतस्तु सः ४२ एवं बुद्धेः परं बुद्ध्वा सं
स्तभ्यात्मानमात्मना जहि शत्रुं महाबाहो कामरूपं दुरासदम् ४३ यत इंद्रियाणि शत्रुलक्षणानि हि विषयाद
मानितेभ्यस्त्वात्मनः तस्मादपि बुद्धेर्व्यतिरेकः बुद्धेरपि यस्मात्स्वभाववत्स आत्मा एवमिंद्रियासक्ते
न क्रोधेन कृच्छ्रे मनसो बुद्धेरात्मनो वा दोषं इति पर्यालोचयेदित्यर्थः ४३ रहस्यविदो नयमाशयः बुद्धेः पर
एवमेते परोहंकारः सर्वसहमिति सभेदात्मा सखलु परमो भेदः अत एव च परिसरणस्य खंडनाभावान्न क्रोधस्य
उदये ते अतः परमहंकारे परमोत्मादं संविदात्मके गर्हीनां क्रोधम विधाय त्वा नेशत्रुं जहीति शिवम् श्री

ध्यात्मसंग्रहः यतोनिरालंबो देहे च योगोऽनेनाधिगच्छति किं नाम तत्समकुर्वीति कोथाया शाश्विनविश्रमा ४२ आचार्या
भिनवगुप्तविरचिते श्रीभगवद्गीतार्थसंग्रहे तृतीयोध्यायः ३ श्रीभगवानुवाच इमं विवस्वते योगं प्रोक्तवा
नहमव्ययम् विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेब्रवीत् एवं परम्पराप्राप्तमिमं राजर्षयो विदुः स कालेनेह म
हता योगो नष्टः परंतप स एवायं मया तेद्य योगः प्रोक्तः पुरातनः भक्तोसि मे सखा चेति रहस्यं ह्येतदुत्तमं प
तम्म गुरुपरम्पराप्राप्तमपि अष्टिवेनतिविष्टमिमनेन भगवान स्वज्ञानं सकुले भ्रतागोरवं च भरशायति भक्तोसि
मे सखा चेनीति तेभक्तोमनमरमः सखा च वशाक्षेनान्वावयच्चोते नेन यथाभिलाटनेभिलाणोप्राधामं गवा
नयत्रे प्राथा सेपवं भक्तिश्च गुरुप्रतिभिधानेन सारविनमपीतितामर्यार्थः ३ अर्जुनो भगवत्स्वरूपं जानन्नपि
लोके स्फुटीकर्तुं पृच्छति अपरं भवतो जन्म परं जन्म विवस्वतः कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति
श्रीभगवानुवाच बहूनि मे व्यतीतानि जन्मानि तव चार्जुन तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप अजोपि
सन्नव्ययात्मा भूतानामीश्वरोपि सन् प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया यदा यदा हि धर्मस्य ग्लानिर्भ
वति भारत अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् श्रीभगवान्किल स्वशक्तिमाकृष्य नाकुरीरसमर्कमा
त्रवद्धितोपि स्थितिकारिणा कारुणिकतया तमात्मानं सृजति आत्मा स्वीकृत्य एषः प्रेशउपकारकत्वेनाभ्युत्थान

गी॰
से॰ श्री
१९
16

भूतेयत्र तदात्मानं शेषशरीरं गृह्णामीत्यर्थः ७ परित्राणाय साधूनां विनाशाय च दुःकृतां धर्मसंस्थापनार्थाय
सम्भवामि युगे युगे जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन अतएवास्य
जन्म दिव्यं यत आत्ममायया योगमायया स्वमात्मेच्छाकारेण न कर्मभिः कर्मापि दिव्यं फलदानासमर्थत्वात् या
श्चैवमेतत्तत्त्वं वेत्ति आत्मन एवमेव मम देहो मोक्षं स भगवद्देहे वर्तते जानाति ९ वीतरागभयक्रोधा मन्मया मामु
पाश्रिताः बहवो ज्ञानतपसा पूता मद्भावमागताः तथा चैवं विदितः मन्मयतां प्राप्ताः श्रीकृष्णात् क्रोधादिरहिता
निष्फले कर्मकरणीये कुर्वाणा बहवो मत्स्वरूपमवाप्ताः १० यतः ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहं मम
वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः क्षिप्रं हि मानुषे लोके सिद्धिर्भवति
कर्मजा ये यथैव बुद्ध्या मामाश्रयन्ते तेनात्मीयेन देवस्वरूपेण गृह्णामि तांस्तान् अनुगृह्णामि एवमेव मदीयमार्गं मन्मया
ममसत्यामवश्यमेवानुवर्तन्ते न हि जानाति शमादिमार्गं मदीयं च मानयेत् काङ्क्षावद्यत्नेनेह चातुर्वर्ण्यं मया सृ
ष्टमिति अमस्त्याहस्तटस्थैर्लिट् यथातिरोभावोऽशिनेऽगृह्णाति गृह्णाति श्रुतिरित्यर्थः एवमिहाप्यनुवर्तन्ते इति
मानुषे एव लोके भोगापवर्गलक्षणा सिद्धिर्नान्यत्रेति ११ चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः तस्य कर्ता
रमपि मां विद्ध्यकर्तारमव्ययम् न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा इति मां योऽभिजानाति कर्मभिर्न सब

ध्यते ॥ एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ मम किल कथमाका
शकल्पस्य कर्मभिर्लेपः आकाशप्रतिमत्वे कामनाभावादिमत्वेन ज्ञानप्रकारेण यो भगवन्तमेवाश्रयते सर्वेस
र्वेदान्तेद्वने परमेश्वरमेव न वासुदेवात्परमस्ति किंचिदिति निर्माविमृशति तस्य किं कर्मभिर्बन्धः तस्मात्त्व
यावद्बुध्यापवित्रीकृतत्वमपि कर्माण्येव संपकर्त्तव्यानि कुरु १५ अथोच्यते कर्मणादेव सिद्धिरिति तत्र यतः ॥ किं
कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ॥ तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् १६ कर्मणो ह्यपि बोद्धव्यं
बोद्धव्यं च विकर्मणः ॥ अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः १७ कर्माकर्मणोर्विभागो दुःपरिज्ञानः तथा
च कर्मण्यपि मध्ये दुष्टकर्मापि अग्निष्टोमे इव पशुवधः विरुद्धेऽपि च कर्मणि शुभमस्ति कर्म तथा हिंसया।
णावुधे सज्जोपतापाभावः अकरणेऽपि च शुभाशुभं कर्मास्ति वामनस्य कृतानां कर्मणामवश्यंभावित्वात् तेषां
ज्ञानमेवैकेन दुःपरिहरत्वात् अतः कुशलैरपि गहनत्वात्कर्म न ज्ञायते अनेन शुभकर्मणा शुभमस्माकं भविष्य
ति अनेन च कर्मणा मनोरथेन मोक्षेण भविष्यतीम तस्माद्दत्यमाणो विज्ञानवह्निरेवावश्यं सकलशुभा
शुभकर्मैधनस्तोमस्य भस्मकः प्रकरणेनानेनैशयति भगवतोऽभिप्रायः १७ उभेवोद्घाटयितुमाह ॥ कर्मण्यकर्म यः
पश्येदकर्मणि च कर्म यः स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् १८ कर्मणीति आत्मीये च कर्मसु यः।

अकर्तृत्वात्कर्मणि यः पश्यति प्रशान्ततया अकर्म स्वपरकृतेषामात्मकृतं न जानाति परिस्पन्दोऽहमिति स्वरूपेण न स ए
व सर्वेषु मध्ये बुद्धिमान् कार्त्स्न्येन सा कल्पना सो कर्म करोति अनेनैकेन कर्मणा फलेषीयतामित्यर्थः इति तदशायां
प्रशान्तत्वेन कृत्स्नानि कर्माणि कृतानि स्युः इति अतः सर्वमेव करोति न किंचित् करोतीत्युपनिषत् कर्मणि
देहेन्द्रियक्रियायामकर्म स्वात्मनि निष्क्रियत्वे श्रोत्रादीनि शब्दादिषु वर्तन्ते वागादीनि वचनादानादौ मम कि
मायातमिमे वर्तन्ते यः पश्येत् अकर्मणि च परैः प्रमातृभिः कृते कर्मणि प्रजादौ कर्मक्रियां जानाति प
तेन कर्तारः सर्वे इदमेव निरहंमाः प्रजकेन विभेदेन सदा प्रजेति प्रजनमिति सिद्धभाषायां मानात् स एव मनुष्ये
ष्यासामान्यजनेषु मध्ये बुद्धिमान् देहेन्द्रियादिषु विकर्तृत्वदर्शनादात्मनि निष्क्रियत्वदर्शनाच्च स एव कृत्स्न
कर्मकृत् कर्तृत्वेन देषु स्वरूपदृष्ट्यवसायात् प्रजनामास्ति मे तृष्णिर्नास्ति विदोषप्रजनात् प्रजकेन
विभेदेन सदा प्रजेति प्रजनमिति सोमानेदपादाः ननु परकृतेन कर्मणा कथं स्वकीयकर्मदर्शनं न ह्यन्यकृ
तभोजनेन स्वकृतभोजनाद्युपगमः तस्मात् कर्मणि च कर्म यः पश्येदिति कथमिति चेत् ज्ञानिन एवं विधाद्
सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥२०॥ अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिं यं प्राप्य न निवर्त्तन्ते तद्धाम
परमं मम ॥२१॥ पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया (यं प्राप्य न पुनर्जन्म लभन्ते योगिनोऽर्जुन) यस्यान्तःस्थे
नि भूतानि यत्र सर्वं प्रतिष्ठितं ॥२२॥ उक्तप्रकारं कालसंकलनाविवर्जितेन वासुदेवतत्वेनाव्यक्तेन सर्वं जगत्ततं ।
अव्यक्तेरूपापन्नान् तत्र भक्तिलभ्यमिमाविदितेप्राक् तत्रस्थैवैनहि संघत्रत्वत्वविनाशरूपे सदा तथा
भूते तत्रकः पुनः शब्दस्याहनिशाहस्यवार्थः सदिमथैतत्स्वभावविच्छेदापेतः नवसदातनविष्णो ।
र्णाविद्यातिरिक्तविशुद्धनिष्ठात्मकपरबोधस्यात्मस्वभावस्य परमेश्वरस्यानज्ञाववाध्यस्यैन स्वभाववि ।
च्छेदः कोपि कदापास्ति अतो युक्तमुक्तं मामुपेत्य निवृत्ति एवं च सततं ताभ्यां मे न येषां क्लेशविनेव भगवदा
त्मिल्लेषो ह्यतमयुक्तम् २२ इदानीमुक्तां मार्गयेपवर्गभोगवेच्छतितेषां कश्चिद्विशेष उच्यते यत्र काले त्व ।
नावृत्तिमावृत्तिं चैव योगिनः प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥२३॥ अग्निर्ज्योतिरहः शुक्लः षण्मा ।
सा उत्तरायणम् तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥२४॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्त्तते ॥२५॥ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते एकया यात्यनावृत्तिम

कथयावर्त्तते मया ॥ २७ नैते सृती पार्थ जानन्योगी मुह्यति कश्चन तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन
वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टं अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चा
द्यम् ॥ २८ अनाहत्निर्मोहः आहत्निर्भोगाय इत्येणार्थेनायनेषात्मासिकेन अप्रकाशादियमेकत्वाहृद्धा
नाडिकेः शुक्लरूपवर्त्मेन अन्यो विपरीतेन विपर्ययेण तत्र वेदमसंभोग्यो शान्त्युशैवशाद्धोगायाहत्निः अन
योर्गतेर्मध्यादाद्ययानाहत्निर्मोहः अन्ययाभोगः यतेस्सृती योवेत्ति आत्यन्तरेण क्रमेण योगाभ्यासवी
क्तेनेमर्थः यतस्त्वविततप्रकाशमानेश्वर्ये विस्तारयतोमलम् सर्वेषु कालाग्रमेतवास्तहि षयेयोग
मभ्यसेत् अत्र सद्दृश्वमासृः सर्वानुग्राहकतयामर्थ्ये आध्यन्तरकालस्वातमत्क्रोतिभेदमभिधायप्रक
तमेव सुखप्रमेयमुपसंहृतेन तस्मात्सर्वेषु कालेष्विमादिना अत्येति अभिभवति सर्वकर्मसंस्काराणां भ
गवत्स्वरूपाविफलीकरणात् सर्वकर्मपरित्यचायोस्यसवैनैव विंदति परं शिवम् २८ सर्वसत्वगतेने
नविज्ञातपरमेश्वरे अत्र वेदिते सावस्थानय सोक्षमस्ते विभुः इति संग्रहश्लोकः इति श्रीमदाचार्याभिन
वगुप्तविरचिते श्रीभगवद्गीतार्थसंग्रहे ऽष्टमोध्यायः ८ श्रीभगवानुवाच इदन्तु ते गुह्यतमं प्रवक्ष्या
म्यनसूयवे ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् । राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् प्रत्य॥

गी॰
सं॰
३५
35

वगमं धर्म्म्यं सुसुखं कर्त्तुमव्ययं॥ अनसूयवे ज्ञानं संक्षेपतो कारणेशुद्धं ज्ञानविज्ञानमागयत् राजते स
र्वविद्यामध्ये दीप्यते या २ इहैवोच्यते अध्यात्मविद्याविद्यानामिति राजेन जनकादीनामप्याधिकारश्लेषो रा
हस्यप्रतिगुप्तत्वात् उत्तमपवित्रत्वं भावेनाविक्रमत्वात् कर्त्तुमनुष्ठातुं सुसुखं न चास्य ब्रह्मलोपास
त्मनः कर्मणो न कर्मेव बहुप्रयोगादिनाव्ययोस्ति २ अश्रद्दधानाः पुरुषाधर्मस्यास्य परंतप। अप्राप्य मां
निवर्त्तन्ते मृत्युसंसारवर्त्मनि ३ मया ततमिदं सर्वं जगदव्यक्तमूर्त्तिना। मत्स्थानि सर्वभूतानि न चाहं तेष्ववा
स्थितः ४ न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्। भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ५ यथाकाशस्थि
तो नित्यं वायुः सर्वत्रगो महान्। तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ६ सर्वभूतानि कौन्तेय प्रकृतिं या
न्ति मामिकाम्। कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहं ७ निवर्त्तन्ते पुनः पुनर्जायन्ते म्रियन्ते च मत्स्था
नि भूतानीति सर्वमपि गतानाम् स्वप्रतिष्ठायामात्मा विद्यमानत्वात् भूतरूपबोध्यात्मकप्रसिद्धत्वीयजे
उन्नूपभुः सरीकारेणानुदवभासेननहि पीतबोधस्वभावतिरोधानमित्यतदाचनचाहं तेष्ववस्थितिः न च मत्स्था
न्यविद्याधानेन नाहं स्पृष्टः नहि स्वप्नाद्यविविक्तं सेवितस्वभावे परमेश्वरे समस्तवस्तुपरिच्छेदप्रतिष्ठास्या
त्तेमसेन अपि तु कृशोदवदन्तोऽहमिदं वीर्यो दिस्थितमिति मितमेव स्वभावं प्रतिष्ठानतया पश्येति न तु क

थमेन हि हृत्स्थमित्याह पश्य मे योगमैश्वरमिति योगः शक्तिर्युज्यमानत्वात् एतदेव ममैश्वर्यं यदेवं निरतिशा
याद्भुतत्वमिति स्थितेऽस्मिन्नर्थः यथाकाशवाय्वोरविनाभावित्वेऽपि संबन्धो न जातश्चित्तभ्रमः स्पर्शनाश्रयुते
एवं सकलसंसारविस्तारेऽपि भगवतो न सर्वजनविषये प्रकृतिमव्यक्तरूपां ७ प्रकृतिं स्वामवष्टभ्य विसृ
जामि पुनः पुनः भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ८ न च मां तानि कर्माणि निबध्नन्ति धनंजय
उदासीनवदासीनमसक्तं तेषु कर्मसु ९ मयाध्यक्षेण प्रकृतिः सूयते सचराचरं हेतुनानेन कौन्तेय जगद्विपरि
वर्तते १० स्वां प्रकृतिमवष्टभ्येत्येतेनावतारजन्मापि स्थितो ये भावग्रामः परप्रकृतित्वयात्मप्रकाशतामागमः न च मां स्ति
कर्मबन्धः उदासीनत्वेन वर्तमानो हेतुनानेन एवाहं जगन्निर्माणेनाश्रितव्यापारत्वाद्धेतुः १० अवजानन्ति मां
मूढा मानुषीं तनुमाश्रितम् परं भावमजानन्तो मम भूतमहेश्वरम् ११ सोऽहं सर्वजनातीतः शाश्वतः सर्वसा
क्षी परस्वरूपतया वक्तास्पदम् यन्मनुष्यादिवदहं शरीरविशेषसंगतिं मन्वतः सर्वे योऽयं नोपलभ्यते स कथमस्तो
ति ११ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः १२ तेषां च
कर्मज्ञानमाकांक्षासु सर्वं निष्फलमवस्तुविषयत्वात् आसुरीं राक्षसीं चेति डंभक्रूरजस्तमोधर्माणाम् इति

११

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् १३ सततं कीर्तयन्तो मां यत

तेतश्च दृढव्रताः नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते १५ ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते एकत्वे
न पृथक्त्वेन बहुधा विश्वतोमुखं १६ अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् मन्त्रोऽहमहमेवाज्यमहमग्नि
रहं हुतं १७ पिताहमस्य जगतो माता धाता पितामहः वेद्यं पवित्रमोंकार ऋक् साम यजुरेव च १८ गतिर्भर्ता प्रभुः
साक्षी निवासः शरणं सुहृत् प्रभवः प्रलयः स्थानं निधानं बीजमव्ययं १९ तपाम्यहमहं वर्षं निगृह्णाम्यु
त्सृजामि च अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन २० दैवी सात्त्विकी यजेतो वा स्यादित्यादियोगैः प्रमेतमो
ज्ञानयज्ञेनैवोपासते अतः केचिदेकतया ज्ञानतः केचिद्बहुधा कर्मयोगात्मकतया एव सर्वे न तु कर्मता
वच्छेदककलापृथ्वाम भेदोऽपि कि कथमभिन्नेन भगवतस्तद्व्याप्यतीत्युच्यते अहं क्रतुरिति एकस्यैव विभा
गस्य ब्रह्मतत्त्वस्य परिकल्पितसाधनाधीनेकर्मणि पुनरेकत्वे निर्विशेषयतिक्रियायाः सर्वेकारककात्मसात्त्वका
रेणावस्थाने भगवत एव व्याप्तिश्रमविरहवत्त्वात् उक्तं च सैषक्रियात्मिकाः शक्तिः शिवस्य पशुवर्तिनी बन्धयि
त्री स्वमार्गस्थात्मानामिच्छयापाद्यिकेति मयाप्युक्तं उपक्रमे यैव बुद्धिर्भावाभावानुयायिनीति तत्र तत्र वित
त्य विचारितं चरमं तत् इति ते हि एवमेते उपास्महे इमा यद्वैनकथाप्रसंगेनाक्रम् १९ नन्वेवं यदि वा त्वया गा
दिनापि ब्रह्मणि न तर्हि विशेषो मा दिशापि किम मेयाज्यः प्रमुग्णमेभेदवादः वासुदेव एवेति विकल्प्यतापि

वर्गोस्ति स्वर्ग इत्युच्यते॥ त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ते पुण्यमासाद्य सुरेन्द्रलोकम
श्नन्ति दिव्यान्दिवि देवभोगान् ॥२०॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति एवं त्रयीधर्ममनुप्र
पन्ना गतागतं कामकामा लभन्ते ॥२१॥ यद्यपि ते मामेव यजन्ते तथापि स्वर्गमात्रप्रार्थनया मितकर्मनिजसमवद्धवेलत
या स्वर्गादिमात्रेणैव फलेनावच्छिद्यन्ते ततः एवैषां पुनरावृत्तिः कोर्थः एवं ते गतागतं लभन्ते २१ न तु यथा मम भ
क्तानां ज्ञानिनां समस्तधर्मोस्त्वभावः तथाहि॥ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योग
क्षेमं वहाम्यहं २२ येप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः तेपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् २३ अहं हि स
र्वयज्ञानां भोक्ता च प्रभुरेव च न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते २४ यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्र
ताः भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोपि मां २५ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति तदहं भक्त्युपहृ
तमश्नामि प्रयतात्मनः २६ ते चामी मामेव चिन्तयन्तः कथमनन्याः अविद्यमानमन्यन्मद्व्यतिरिक्तं काम्यनीयं फलं येषा
मिति योगोप्राप्तिलक्षणमत्स्वरूपलाभः क्षेमं प्राप्तभगवत्स्वरूपस्थितिस्थानालाभपरिरक्षणं येन योगक्षेमं पुनरशक्या
पि न भवेदित्यर्थः येपि चान्यदेवताभक्ताः तेरूपासते तेनैव मामेवोपासते न हि ब्रह्मव्यतिरेकि किंचिद्रुपास्यमस्ति किं
त्वविधिनेति विशेषः अविधिरत्रापि विधिर्नानाप्रकारैर्विधिभिः स्वधर्मैवापरं ब्रह्मत्वमज्ञात्वा भावेयाजन्त इति न तु यथा।

गी॰ टी॰ ७७

ष्यापि देशीनां तत्तद्गुणसमुपार्जितमहापातकमलीमसेष्वोत्थानमविधिनादृष्टविधिनेति। एवं हि सति मा-
मेव यजेते सर्वयज्ञानां चाहमेव भोक्तेति दृश्यमानमेतदसमंजसं भवेदित्यलेकल्मषकलिलैः साकंमेलापका-
प्रसङ्गः स्वरूपनिरूपयेति प्रमास्वात्मख्यातिविक्षाभेदनयेन ब्रह्मस्वभाववादिनैव काविदेवतेति यद्दीनाला-
मेव यजेते तेनापि वस्तुतो मामेव स्वात्मरूपं यजते तेनापि वस्तुतो मामेव स्वात्मरूपं यजते किन्तु विधिनादृष्टेन
विधिनाभेदग्रहणरूपेणेमनपचार। ननु मा स्वात्मानं तेनानेन देवतारूपतया भेदेनैव न जानाति अतः व्या-
वेतेमद्रूपात्किं देवव्रतं नैव देवा मा तीमादि। एतदेव च्यवनमित्यावत्। येन मत्स्वरूपमभेदविधुत्तेदे-
व भूतपितृयागादिनापि मामेव यजते तेन च मद्याजिनो मामेव गच्छन्तीत्युपसंहरिष्यति। ननु ह्यमागाध-
सुहित्वेदेवतोपच्यतेनकथमनुदिशस्वात्मतनसयाजनं आदिमः प्रयाणयश्चरुतीति विधिशेषरू-
तदेवतोद्देशात्मकविधेन तप्रभावितो हि सावुद्देशः न च स्वात्मविषयो विधिरस्तीत्यभिप्रायेणाह अवि-
धिपूर्वकं मामिति मामिति स्वात्मख्यातिविक्षायां देवतायामस्त्यपेक्षो विधिरप्राप्तप्रापणरूपत्वात् स्वात्मा-
तपरमेश्वरेण विधिपूर्वको विधिपरिप्रापितत्वाभावात्। न हि तदनुद्देशेन किंचित्संबध्यते। तेन विधिपरि-
प्राप्यतेऽसादिदेवताद्देशाङ्गसर्वेषु सम्वात्मा विशेषावभासनस्वभावत्वादृदेशाद्देवतावभासमित्रिस्यानीय

नचैवाहमल्पमहिमकयासन्ततावभासमानः सकलत्रकल्पः सततो ह्यष इति शुक्लमिद्धमेतन्मामेवयजेतवि
धिपूर्वकत्वात् मुख्यभूतमत्वामिफलमप्तान्यनिकृद्गेभिप्रायवेनास्तिअपितु परिमितहविषामप्यानी
येरूपदादिमात्रप्रामेवयाजकवस्त्रवितार्थेनमेषामिति प्रथ्यापितपरमेश्वरपदे यत्करोमयेव वेदान्वेदनवे
दशाम्भवपदे रूपेणनिवेदवान्स्वगोष्ठ्यांयजमानतो प्रतिजह्रुः जातोयजमानकः सर्वेः कर्मरसमयवाद्ध्य
मतः सेवितव्येमोखिलात्मामानेदमद्योतुथिविदरथतेन प्राप्य स्वर्गो स्थितिमिति २६ एवंयः कर्मेण
वेदितिनयेन्द्रादिदेवतायागोपि ईश्वरयागरतियत्प्ममत्कर्मेतदप्पमहेश्वरस्यानभावेनरूपंतस्यैवसर्वेश्वा
रेशादिमार॥ यत्करोषियदश्नासियज्जुहोषिददासियत् यत्तपस्यसिकौन्तेयतत्कुरुष्वमदर्पणं॥२७ शुभा
शुभफलैरेवंमोक्ष्यसेकर्मबन्धनैः संन्यासयोगयुक्तात्माविमुक्तोमामुपैष्यसि॥२८ समोहंसर्वभूतेषुनमेद्वे
ष्योस्तिनप्रियः येभजन्तितुमांभक्त्यामयितेतेषुचाप्यहम्॥२९ अपिचेत्सुदुराचारोभजतेमामनन्यभाक् सा
धुरेवसमन्तव्यः सम्यग्व्यवसितोहिसः॥३० क्षिप्रंभवतिधर्मात्माशश्वच्छान्तिंनिगच्छति कौन्तेयप्रतिजानी
हिनमेभक्तःप्रणश्यति॥३१ देवतान्तरयाजिनोयत्नोमितमनोरथाः फलंलभन्ते इति अनन्तस्यसर्वेश्वरस्य
पदेशाकर्मेणमदर्पणमन्यथैवनोद्भावनेकुरु एवमेवचसंन्यासयोगः निविस्तीर्णविमुक्तमायेश्वरस्ता

देवप्रतिज्ञाने इति गुरूक्तगुरूक्तोऽयमर्थो भगवत्प्रतिज्ञानेनात्मकृतमोहच्छेदो भवति ३१ मां हि पार्थ व्यपाश्रित्य
येऽपि स्युः पापयोनयः स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिं ३२ किं पुनर्ब्राह्मणाः पुण्या भक्ता राज
र्षयस्तथा अनित्यमसुखं लोकमिमं प्राप्य भजस्व मां ३३ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवै
ष्यसि युक्त्वैवमात्मानं मत्परायणः ३४ पापयोनयः पशुपक्षिसरीसृपादयः स्त्रियः इमहताः वैश्याः इति कृष्या
दिकर्मीतरस्तथा शूद्रा इति कास्तैमन वैदिकक्रियानधिकृताः परंतु रहस्यश्रुतेऽपि मदाश्रिता मामेव यजं
ते गजेन्द्रमोक्षणादौ निहिंचु विनानि भगवतः सहस्रशः श्रूयते किं पुनरेतद्विपरीतहतयः केचिदा
वर्त्तते द्विजराजन्यप्रशासापरमेतद्वाक्ये नतस्मादिशुपवर्गप्रामिनात्मूर्येणेति ते भगवतः सेवायो
ग्यादिकाशक्तिं मित्तविषयतयाविरूपतः नमेद्वेष्योस्तिनप्रियः अपिचेत्सुदुराचारोऽनन्याविवेव
प्रकारस्फुटार्थप्रतिपादकानि वाक्यानि विशेषयेता निरतिशयं शुक्ति प्रपंचसाधितानीहेन भगव
तेने भेदलिंगबलादेवानये तो श्रामामागमविरोधानवेतयमानाः कथमिदमिति पर्यनुयुज्यमानाय।
दिपरमेतनेर्मीतनजनाः दिमद्यारद्दारद्दीनाविष्टांतः करणामात्मर्या वादिथलज्ञाजिद्यौ हृताः
वाप्तरवेहद्वयः समग्रमनेनस्यामत्मलापिन इति हा सरस्तविषयभावमात्मनाऽपेयोपिपन्नेवेवा

त्यो सर्वस्य करोतीति शिवम् २४ अहं ते वत्सलात्परात्सर्वानुग्रहशालिनी शक्तिर्व्यज्यते भनेते नयतनी
येन दास्मये सेयदेये इति श्रीमहाज्ञानकाभिनवगुप्तविरचिते श्रीभगवद्गीतार्थसंग्रहे नवमोऽध्यायः
९ प्रार्थितेनैव विभवध्याये येषां वार्थो लक्षितः स एव अति पदपादे दशमेऽध्याये प्रतिपाद्यते तथा चाह भूय ए
व कामेवार्थं विस्पष्टीकर्तुं पुनः कथ्यमानं शृणु इति अर्जुनोऽपि तमेवाभिधास्यति भूयः कथयेति
इत्यायतनासयम शिष्टनिगतव्याख्यानमिति किं पुनः केन न सान्तरं यन्तनिर्णीयते श्रीभगवानु
वाच भूय एव महाबाहो शृणु मे परमं वचः यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया १ न मे वि
दुः सुरगणाः प्रभवं न महर्षयः अहमादिर्हि देवानां महर्षीणां च सर्वशः २ यो मामजमनादिं च वे
त्ति लोकमहेश्वरम् असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ३ बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः
शमः सुखं दुःखं भवोऽभावो भयं चाभयमेव च ४ अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः भवन्ति
भावा भूतानां मत्त एव पृथग्विधाः ५ महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा मद्भावा मानसा जाता येषां लो
क इमाः प्रजाः ६ एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः सोऽविकम्पेन योगेन युज्यते नात्र संशयः ७ अहं स
र्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इति मत्वा भजन्ते मां बुधा भावसमन्विताः ८ मच्चित्ता मद्गतप्राणा बोधयन्

नः परस्परम् कथयंतश्च मां नित्यं तुष्यंति च रमंति च ९ परस्परं बोधयन्तोऽन्योन्यं बोधयत्प्रकारमेकमणात्सर्वा
प्रवृद्धिप्रमातारपकईश्वरइतिवितमव्याप्यात्ह्वैनैवसर्वशक्तिकमवेगतनत्स्वात्मस्वरूपतापिगमेनमादृश
धैमस्यामितिभावः ९ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ददामि बुद्धियोगं तं येन मामुपयांति
ते १० तेषामेवानुकंपार्थमहमज्ञानजं तमः नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ११ अर्जुन उ
वाच परं ब्रह्म परं धाम पवित्रं परमं भवान् पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं १२ आहुस्त्वामृषयः
सर्वे देवर्षिर्नारदस्तथा असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे १३ सर्वमेतदृतं मन्ये यन्मां वदसि केशव
न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः १४ स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम भूतभावन भूतेश
देवदेव जगत्पते १५ वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः याभिर्विभूतिभिर्लोकानिमांस्त्वं
व्याप्य तिष्ठसि १६ कथं विद्यामहं योगिंस्त्वां सदा परिचिंतयन् केषु केषु च भावेषु चिंत्योसि भगवन्म
या १७ विस्तरेणात्मनो योगं विभूतिं च जनार्दन भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतं १८ श्रीभग
वानुवाच हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य मे १९ अह
मात्मा गुडाकेश सर्वभूताशयस्थितः अहमादिश्च मध्यं च भूतानामंत एव च आदित्यानामहं विष्णुर्ज्योति

षां रविरंशुमान् मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी २१ वेदानां सामवेदोस्मि देवानामस्मि वासवः इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना २२ रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसां वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् २३ पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् सेनानीनामहं स्कन्दः सरसामस्मि सागरः २४ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं यज्ञानां जपयज्ञोस्मि स्थावराणां हिमाचलः २५ अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः २६ उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवं ऐरावतं गजेन्द्राणां नराणां च नराधिपम् २७ आयुधानामहं वज्रं धेनूनामस्मि कामधुक् प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः २८ अनन्तश्चास्मि नागानां वरुणो यादसामहम् पितॄणामर्यमा चास्मि यमः संयमतामहं २९ प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् मृगाणां च मृगेन्द्रोहं वैनतेयश्च पक्षिणां ३० पवनः पवतामस्मि रामः शस्त्रभृतामहं झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ३१ सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन अध्यात्मविद्या विद्यानां वादः प्रवदतामहं ३२ अक्षराणामकारोस्मि द्वन्द्वः सामासिकस्य च अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ३३ मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यतां कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ३४ बृहत्साम तथा साम्नां

गी॰
से॰
प॰
40

गायत्री छंदसामहम् मासानां मार्गशीर्षोहमृतूनां कुसुमाकरः ३५ द्यूतं छलयतामस्मि तेजस्तेजस्वि
नामहम् जयोस्मि व्यवसायोस्मि सत्वं सत्ववतामहं ३६ वृष्णीनां वासुदेवोस्मि पांडवानां धनंजयः मुनीनामप्य
हं व्यासः कवीनामुशना कविः ३७ दंडो दमयतामस्मि नीतिरस्मि जिगीषतां मौनं चैवास्मि गुह्यानां ज्ञानं
ज्ञानवतामहं ३८ यच्चापि सर्वभूतानां बीजं तदहमर्जुन न तदस्ति विना यत्स्यान्मया भूतं चराचरं ३९ नांतो
स्ति मम दिव्यानां विभूतीनां परंतप एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ४० यद्यद्विभूतिमत्सत्वं श्रीम
दूर्जितमेव वा तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् ४१ अथवा बहुनैतेन किं ज्ञातेन तवार्जुन विष्टभ्या
हमिदं कृत्स्नमेकांशेन स्थितो जगत् ४२ अत्र मम्मोद उन्मादः अहमात्मममेनुष्यवकेर निवारयति श्रमया
स्थावराणां हिमालय इत्यादि वाक्येषु हिमालय एव भगवान्नाम इति व्यवच्छेदेन निर्विभागताभावाद्बु
ल्लदर्शीने त्वं दिनमम विष्णोन यतो यस्मा खंडकाव्यामिः तथा वेतसि नो पारा द निनो च जिज्ञासतितस्मा
यमुपदेशयंथः तथाह्युपसेदाराभेदाभेदवादे यद्यद्विभूतिमत्सत्वमित्येनेनाभिधाय पश्चाद्भेदमेवाप
मेदयति अथ किं बहुनैतेन विष्टभ्याहमेकांशेन जगत्स्थितइति उक्तंहि पादोस्य विश्वा भूतानि त्रिपादस्या
मृतं दिवीति प्रजानां स्रष्टिरतः सर्वमिदं भगवानन्न मे नैतानि विविधिद्रूपेभोज्यमानसकलमप्रविषयतोया

तीति शिवम् ४२ एकांशायामिंद्रियेवापि यदेवायाति गोचरम् तदाखिलाप्यये स्तत्र लभ्यतेऽत्र स्वभावयेत् सं

गृह्णीयं इति श्रीमहाराजानकाभिनवगुप्तविरचिते श्रीभगवद्गीतार्थसंग्रहे दशमोऽध्यायः १० समनेनैतेऽणाध्या

येन यत्पदार्थ उक्तस्तमेव प्रत्यक्षीकर्तुमर्जुनः पृच्छति सएव वाच्यतया मायोपदेशक्रमेणार्थोऽवगतः

सएव प्रत्यक्षमस्य विशेषारूढमाणः स्फुटी भवतीत्यदर्शमेवमेतत्किमित्यस्मौच्यते अर्जुन उवाच मदनुग्र

हाय परमं गुह्यमध्यात्मसंज्ञितम् यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम भवाप्ययौ हि भूतानां श्रुतौ वि

स्तरतो मया त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययं २ एवमेतद्यथात्थ त्वमात्मानं परमेश्वर द्रष्टुमिच्छा

मि ते रूपमैश्वरं पुरुषोत्तम ३ मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो योगीश्वर ततो मे त्वं दर्शयात्मानमव्य

यं ४ श्रीभगवानुवाच पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः नानाविधानि दिव्यानि नानावर्णाकृ

तीनि च ५ पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ६ इहैकस्थं

जगत्कृत्स्नं पश्याद्य सचराचरं मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ७ न तु मां शक्यसे द्रष्टुमनेनैव स्व

चक्षुषा दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ८ संजय उवाच एवमुक्त्वा ततो राजन्महायोगेश्वरो

हरिः दर्शयामास पार्थाय परमं रूपमैश्वरम् ९ अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् अनेकदिव्याभरा

गी॰
टी॰
८९
५५

णोदिव्यानेकोद्यतायुधम् दिव्यमाल्याम्बरधरं दिव्यगंधानुलेपनम् सर्वाश्चर्यमयंदेवमनंतंविश्वतोमु-
खं॥ दिविसूर्यसहस्रस्य भवेद्युगपदुत्थिता यदिभाः सदृशीसास्याद्भासस्तस्यमहात्मनः॥ तत्रैकस्थंज-
गत्कृत्स्नंप्रविभक्तमनेकधा अपश्यद्देवदेवस्य शरीरेपाण्डवस्तदा॥ ततःसविस्मयाविष्टोहृष्टरोमाधन-
जयः प्रणम्यशिरसादेवंकृताञ्जलिरभाषत १४ अर्जुनउवाच पश्यामिदेवांस्तवदेवदेहेसर्वांस्तथा
भूतविशेषसंघान् ब्रह्माणमीशंकमलासनस्थमृषींश्चसर्वानुरगांश्चदिव्यान्॥ अनेकबाहूदरवक्त्र-
नेत्रंपश्यामित्वांसर्वतोनंतरूपम् नांतंनमध्यंनपुनस्तवादिंपश्यामिविश्वेश्वरविश्वरूपम्॥ किरीटिनं
गदिनंचक्रिणंचतेजोराशिंसर्वतोदीप्तिमंतं पश्यामित्वांदुर्निरीक्ष्यंसमंताद्दीप्तानलार्कद्युतिमप्रमेयं २
त्वमक्षरंपरमंवेदितव्यंत्वमस्यविश्वस्यपरंनिधानम् त्वमव्ययःशाश्वतधर्मगोप्तासनातनस्त्वंपुरु-
षोमतोमे॥ युक्तमेतत्क्रियाज्ञानयोरुभयोरपिभेदाप्रतिभासात्मके परमशिवे महादेवेपि तथा समस्तात्म-
कप्रकाशरूपशीलसनातनविधानेयेषांतेसनातनाः तेषांधर्मानवरतग्रहणेसमासपरत्वात्त्वहृष्टिसेद्वारा
विषयः सकलमार्गानीर्णास्त्येगोपायने एतद्देवात्र्याध्यायेरहस्यंप्रायशोदेवीस्तोत्रविवरणेमयाप्रका-
शितंतत्सहृदयैःस्वोपदेशाःस्वयमेवावगम्यतेइतिकिंपुनःपुनःस्फुटतरप्रकाशनवाचालतया १८

अनादिमध्यांतमनंतवीर्यमनंतबाहुं शशिसूर्यनेत्रं पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं
तपंतम् ॥१९॥ द्यावापृथिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्र
व्यथितं महात्मन् ॥२०॥ अमी हि त्वां सुरसंघा विशंति केचिद्भीताः प्रांजलयो गृणंति स्वस्तीत्युक्त्वा महर्
षिसिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः ॥२१॥ रुद्रादित्या वसवो ये च साध्या विश्वेश्विनौ मरुतश्चोष्मपाश्च
गंधर्वयक्षासुरसिद्धसंघा वीक्षंते त्वां विस्मिताश्चैव सर्वे ॥२२॥ रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपा
दम् बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥२३॥ नभःस्पृशं दीप्तमनेकवर्णं व्यात्तान
नं दीप्तविशालनेत्रम् दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा धृतिं न विंदामि शमं च विष्णो ॥२४॥ दंष्ट्राकरालानि
च ते मुखानि दृष्ट्वैव कालानलसन्निभानि दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥२५॥ अमी
च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योध
मुख्यैः ॥२६॥ वक्त्राणि ते त्वरमाणा विशंति दंष्ट्राकरालानि भयानकानि केचिद्विलग्ना दशनांतरेषु संदृ
श्यंते चूर्णितैरुत्तमांगैः ॥२७॥ यथा नदीनां बहवोंबुवेगाः समुद्रमेवाभिमुखा द्रवंति तथा तवामी नरलोक
वीरा विशंति वक्त्राण्यभिविज्वलंति ॥२८॥ यथा प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः तथैव

गी॰ टी॰ ५२

52

नाशाय विशंति लोकास्तवापि वक्त्राणि समृद्धवेगाः २९ लेलिह्यसे ग्रसमानः समंतान्लोकान्समग्रान्ज्व
लद्भिः तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपंति विष्णो ३० आख्याहि मे को भवानुग्ररूपो नमो
स्तु ते देववर प्रसीद विज्ञातुमिच्छामि भवंतमाद्यं न हि प्रजानामि तव प्रवृत्तिं ॥ न वशूहमिं न वेद्मि केना
शयेनेह रणाय प्रवृत्तेति न दृश्यभवतोनंते जगतो विद्याविद्यात्मनः शुद्धाशुद्धमिश्रसविद्वलग्रासक
णाव भिधीयत इति प्रायशः स्त्रियिंतमग्राप्यायेदृस्य इह किं तमाग्रसे विविसमर्थेभ्यास्त्व कियंतः कि
लेखनायसदोः स्त्रियसमालभ्येमहि अत्रयत्नके मयाहृतनुवे निमित्तेयशोवीभवेति भगवतानन्यस्तु
केयागर्जुनेन नैवैतद्विद्मः कतरन्नो गरीय इत्यादि ३१ श्रीभगवानुवाच कालोस्मि लोकक्षयकृत्प्रवृद्धो
लोकान्समाहर्तुमिह प्रवृत्तः ऋतेपि त्वां न भविष्यंति सर्वे येवस्थिताः प्रत्यनीकेषु योधाः ३२ तस्मात्व
मुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुंक्ष्व राज्यं समृद्धम् मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसा
चिन् ३३ द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् मयाहतांस्त्वं जहि मा व्यथिष्ठा युध्य
स्व जेतासि रणे सपत्नान् ३४ संजय उवाच एतच्छ्रुत्वा वचनं केशवस्य कृतांजलिर्वेपमानः किरीटी
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ३५ अर्जुन उवाच स्थाने हृषीकेश तव प्रकीर्त्या

जगत्प्रहृष्यत्यनुरज्यते च रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः [३६] प्रकीर्त्तिः प्रकी
र्त्तने ३६ कस्माच्च ते न नमेरन्महात्मन्गरीयसे ब्रह्मणोप्यादिकर्त्रे अनन्त देवेश जगन्निवास त्वमक्षरं सद
सत्तत्परं यत् ॥ समस्तार्थेन अप्रत्यक्षप्रमाविषयत्वात् अथवा अभावोपि यस्मिन्निजनिजविशि
ष्टवाचकसंसर्गिता नानाकारमश्नुवानो न परब्रह्मस्मात्व्यतिरिक्तः सदसद्रूपाभ्याञ्च परं तद्रूपं यद्ब्र
ह्मेति वेद्यानेन रूपेणोपलक्षः ३७ त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् वेत्तासि वेद्य
ञ्च परञ्च धाम त्वया ततं विश्वमनन्तरूप [३८] वायुर्यमोग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च न
मो नमस्तेस्तु सहस्रकृत्वः पुनश्च भूयोपि नमो नमस्ते [३९] नमः पुरस्तादथ पृष्ठतस्ते नमोस्तु ते सर्वत एव स
र्व अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोसि सर्वः [४०] सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव
हे सखेति अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि [४१] यच्चावहासार्थमसत्कृतोसि विहार
शय्यासनभोजनेषु एकोथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् [४२] पितासि लोकस्य चराचर
स्य त्वमस्य पूज्यश्च गुरुर्गरीयान् न त्वत्समोस्त्यभ्यधिकः कुतोन्यो लोकत्रयेप्यप्रतिमप्रभाव [४३] तस्मात्प्र
णम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि

गी॰ अ॰ ५३

देवसोढुम॥४४॥ अदृष्टपूर्वं हृषितोस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे तदेव मे दर्शय देव रूपं प्रसीद देवेश
जगन्निवास॥४५॥ किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव तेनैव रूपेण चतुर्भुजेन सहस्रबा
हो भव विश्वमूर्ते॥४६॥ श्रीभगवानुवाच मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् तेजो
मयं विश्वमनंतमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वं॥४७॥ न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः एवं
रूपः शक्यमहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर॥४८॥ मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममे
दं व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य॥४९॥ संजय उवाच इत्यर्जुनं वासुदेवस्त
थोक्त्वा स्वकं रूपं दर्शयामास भूयः आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा॥५०॥ अर्जुन
उवाच दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः॥५१॥ श्रीभगवानुवाच
सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः॥५२॥ नाहं वेदैर्न तपसा न दा
नेन न चेज्यया शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा॥५३॥ नमो नम इत्यनेन पौनःपुण्यं भक्त्यतिशयावि
ष्कारार्थं यदेव भगवता तिरोहितमध्याये भिधाय स्वस्वरूपं तदेवार्जुनः प्रसन्नोपलभविषयापत्रस्तो
रुद्धरेणाय कदयतीतिनद्याख्यानेकवलेपानरूपमसेगायेतिविरम्यते॥५३॥ भक्त्या त्वनन्यया शक्य अ

हमेवंविधोऽर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ५४ मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः निर्वैरः स
र्वभूतेषु यः स मामेति पाण्डव ५५ सकलोपसंहारार्थेन परमश्रेयोनत्त्वप्राप्त्यनन्तरं स्थितिं स्वानीतिनिरूपसंहारो भ
गवतः सौम्यत्वात् अविद्यमानान्तरालेयरमणीयायां येषां भक्तिः परिपोष्यते ते तेषां वासुदेवः सर्वमिति सदृष्ट
र्वाभिहितोपदेशार्थं समकाराहितध्यानमकेवलं सुदेवतत्त्वमयत्वेन पर्वयोऽथ परदीक्षावतरतीति शिवम् ५५
शुद्धाशुद्धविमिश्रार्थसंविदेकात्मप्रकाशनात् भूर्भुवः स्वस्त्रयं येन स समस्तेन समो मुनिः एषोऽत्र संग्रहः
इति श्रीमहाचार्याभिनवगुप्तविरचिते श्रीभगवद्गीतार्थसंग्रहे एकादशोऽध्यायः ११ अर्जुन उवाच एवं
सततयुक्ता ये भक्तास्त्वां पर्युपासते ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः १ एवमुक्तेन नयेन ये सम्प्रा
ब्रह्मोपासकायेव केवलमात्मसमग्रमुपासते तेषां विशेषाख्यानाय प्रश्नः १ श्रीभगवानुवाच मय्यावे
श्य मनो ये मां नित्ययुक्ता उपासते श्रद्धया परयोपेतास्ते मे युक्ततमा मताः २ मादृश्यैर्विषयो येषां समाव
शो भक्तिसमस्तन्मयीभावस्ते युक्ततमा मम मता इति नेन प्रतिज्ञा क्रियते २ ये त्वक्षरमनिर्देश्यमव्यक्तं पर्यु
पासते सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ३ संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ते प्राप्नुवन्ति मामेव ४
सर्वभूतहिते रताः क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ५ येन त

रेब्रह्मोपासते आत्मानं सर्वज्ञत्वाणिमादिभिर्विशेषणैरात्मनः सर्वैश्वर्यधर्मा आरोप्यंते अतो ब्रह्मोपासका॰
अपि मामेव यद्यपि यांति तथाप्यधिकतरस्तेषां क्लेशः आत्मनि किलापहतपाप्मत्वादिगुणाष्टकारोपवि
धायापस्थानमेवोपासत इति सतः सिद्धगुणग्रामगरिमाणमीश्वरे यत्र साक्षात्स्थितेऽपि द्विगुणमायासं विदंति
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येनैव योगेन मां ध्यायंत उपासते तेषामहं समुद्धर्ता मृत्यु
संसारसागरात् भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ७ मय्येव मन आधत्स्व मयि बुद्धिं निवेशय नि
वत्स्यसि मय्येव योगस्तनममास्थितः ८ प्राग्रपदेशानन्तरं ये सर्वं मयि संन्यस्यंति तेषामहं समुद्धर्ता सकलवि
घ्नादिक्लेशेभ्यः चेतस आवेशनं व्याख्यातं तथावेषपदानमो योगोक्तक्रिमत्वात् तथा च मम सत्त्वे विशिष्ट
करणस्य न स्थितिसमाधिसंभावनाविभावितनयायदा कमपि बोधसमुल्लासयेन्न सानवसदोदितास्व
रसवादिनीयादितिवैतस्विनयसन्निधौ स्फुटमिदापि मैव घे यदा त्वविगलितधनः स्वबचावनितासख
यनकृत्रिमसमुल्लसत्स्वलककंपवक्ष्यानुगः पारीरतिरिपदतोस्फुटसुपादतानश्चितः स्वयस्फुटिति
बुध्यते युगपदेव बोधानलः नैव तत्र वेदिनहृदुक्षाश्रिये वैणिने मदेशमवबुध्यते विवशापाशसंज्ञा
मकमिमाहि ९ अथावेशयितुं चित्तं न शक्नोषि मयि स्थिरम् अभ्यासयोगेन ततो मामिच्छाप्तुं धनंज

प॰ अभ्यासेप्यसमर्थोसि मत्कर्मपरमोभव मदर्थमपिकर्माणिकुर्वन्सिद्धिमवाप्स्यसि॥ तीव्रतर
भगवच्छक्तिपातेचिरतरप्रसादितगुरुचरणानुग्रहेणविनादुर्लभमावेशरूपमभ्यासः अभ्यासेपिन
शक्तोसिविघ्नाद्यभिभवादनतन्मत्प्राप्तिसाधककर्मपूजाजपस्वाध्यायहोमादीन्कुरु॥१०॥ अथैतदप्यशक्तो
सिकर्तुंमद्योगमाश्रितः सर्वकर्मफलत्यागंततःकुरुयतात्मवान्॥ यदिचभगवत्कर्मकर्तुंनशक्नो
सिप्रतनात्कृतात्कर्मावेदनात् तत्सर्वंममसमर्पयसि: आत्मनिवेदनद्वारेणेत्याशयः अयमेवाशयमाश्रि
त्यलघुप्रक्रियायामप्येवोक्तं कृताधिकमविज्ञातेपौर्वापर्यविवर्जितम् यच्चावधानरहितंचेष्टितंविस्ख
लितंचयत् तत्सर्वंममसर्वेशभक्तिस्यात्तेस्तुमेतेः देवत्वेक्ष्यपयाशंभोयतस्त्वंकरुणापरः अने
नस्तोत्रयोगेनतवात्मानंनिवेदये इतिनिष्कारणमहेतुःस्वात्मानंसमर्पयतामिति पारमेश्वरेपिहि
सिद्धांतेस्वात्मनिवेदनेयमेवाभिप्रायः॥११॥ तदिदंतात्पर्येणोपसंह्रियते॥ श्रेयोहिज्ञानमभ्यासाज्ज्ञानाद्ध्या
नंविशिष्यते ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरं॥ ज्ञानमावेशः सोभ्यासात्श्रेयोभ्यासस्यतत्फल
त्वात् तस्मादेवावेशाद्ध्यानंभगवत्स्वरूपेविशिष्यतेविशेषवद्भवति अभिमततत्त्वाभ्यासनिध्यानेनभग
वत्स्वरूपेकर्मफलानिसंन्यस्तानिभवंति अनयाज्ञानत्रैपक्ष्यसंपादितः कर्मफलत्यागेचासंनिकोशा

गी॰
सं॰
९५
95

ति: अतः सर्वकर्मफलत्यागादावेशात्मकं ज्ञानमेव श्रेयो ध्यानम् १२ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च निर्ममो नि-
रहंकारः समदुःखसुखः क्षमी १३ संतुष्टः सततं योगी यतात्मा दृढनिश्चयः मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स
मे प्रियः १४ यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः १५ अनपेक्षः शु-
चिर्दक्ष उदासीनो गतव्यथः सर्वारंभफलत्यागी यो मद्भक्तः स मे प्रियः १६ यो न हृष्यति न द्वेष्टि न शोचति न कां-
क्षति शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः १७ समः शत्रौ च मित्रे च तथा मानापमानयोः शीतोष्णसुखदुः-
खेषु समः संगविवर्जितः १८ तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन केनचित् अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो
नरः १९ ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते श्रद्दधाना मत्परमा भक्तास्तेतीव मे प्रियाः २० मैत्री प्रमत्सरता यस्या-
स्तीति एवं करुणा ममाभीरस्मादि ममकारः अहमुदारहं तेजस्वी अमदनरमादिरहंकारः एतौ यस्य न स्तः
क्षमापकारिणि शत्रौ मनसोपवृद्धिः सततं योगी ध्यानवदा सर्वावस्थायामपि प्रशांतो न कारणाभावात् अनिकेतः गृह-
मेव मया कर्तव्यमिति यस्य नास्ति प्रतिज्ञा यथाप्राप्तमेवाकिंचनया सुखदुःखादिकमुपभुंजानः परमेश्वरवि-
षयसमावेशितहृदयः सुखेनैव प्राप्नोति परमकैवल्यमिति शिवम् २० परमानंदैकरूपसंजाताविशांतेप-
दः स्वयं सर्वास्ववस्थासु वलसमासयत्नतः एषोत्रसंग्रहः श्रीभगवद्गीतार्थसंग्रहे द्वादशोध्यायः १२ अ

ज्र्जुनउवाच प्रकृतिंपुरुषंचैवक्षेत्रंक्षेत्रज्ञमेवच एतद्वेदितुमिच्छामिज्ञानंज्ञेयंचकेशव१ श्रीभगवानुवाच इदं
शरीरंकौंतेयक्षेत्रमित्यभिधीयते एतद्योवेत्तितंप्राहुःक्षेत्रज्ञइतितद्विदः२क्षेत्रज्ञंचापिमांविद्धिसर्वक्षेत्रेषुभारत
क्षेत्रक्षेत्रज्ञयोर्ज्ञानंयत्तज्ज्ञानंमतंमम३तत्क्षेत्रंयच्चयादृक्चयद्विकारियतश्चयत् सचयोयत्प्रभावश्चतत्समासेन
मेशृणु४ऋषिभिर्बहुधागीतंछंदोभिर्विविधैःपृथक् ब्रह्मसूत्रपदैश्चैवहेतुमद्भिर्विनिश्चितैः५महाभूतान्य
हंकारोबुद्धिरव्यक्तमेवच इंद्रियाणिदशैकंचपंचचेंद्रियगोचराः६इच्छाद्वेषःसुखंदुःखंसंघातश्चेतनाधृतिः
एतत्क्षेत्रंसमासेनसविकारमुदाहृतम्७ किंविशिष्टोक्षेत्रज्ञउपास्यइतिश्रूयते सचकिमात्मा उतेश्वरः अथवान्य
तीयःकश्चिदित्यपेक्षायांश्रीभगवानादिशति संसारिणांशरीरंक्षेत्रंयच्चकर्मबीजप्ररोहः अतएव
तेषामात्मागतःकर्मकालुष्यदूषितःक्षेत्रज्ञउच्यते प्रबुद्धानांतदेवक्षेत्रमन्तर्थभेदस्तत्रयथा क्षिणोतिकर्मवे
यमुपभोगेनत्रायतेजन्ममरणभयादितिनोचेत्प्रतिपरमात्मावासुदेवःक्षेत्रज्ञएतत्क्षेत्रंयोवेदयतिवेदेनतेभोवित्त
त्पृथ्वीविधिः तेनयत्प्रसादादचेतनमिदंचेतनीभावमायातिसएवक्षेत्रज्ञोनामःकश्चित् विशेषस्तुपरिमितव्या
प्तिकंरूपमात्मेत्याख्यातिभण्यते अपरिच्छिन्नसर्वक्षेत्रव्यापीपरमात्माभगवान्वासुदेवः ममेतिकर्मणिषष्ठी अर्थः
मुनेनज्ञानेनज्ञेयइत्यर्थः येनविकारंगच्छतियद्विकारि समासेनसंविभागेनैवतान्यस्मान्साधारणान्येणापा

निश्चिनोति यद्यपि ऋषिभिर्बहुधा वेदैश्चाक्रमेण तथापि समासेनाहं व्याचक्षे इति अव्यक्तं प्रकृतिः इंद्रियाणि
मनसा सहैकादश इंद्रियगोचरा रूपादयः पंच चेतनाहंकरशक्तिः धृतयः धृतिरिति एते किल सर्वे क्षेत्रलक्षणाः किमपि
यन्न स्मरामि ते निश्चेनेवाकार्यकामक्रोधादिषु चैतैव मम पर्यायेम किमनेन ईदृशाग्राहेनिममेव भूयासमिति प्राणा-
मेधारणी धृतिरात्मासनात्मिका परस्परं समासेन शुगरागशहवाच्या जायते ६ एवं क्षेत्रमाख्यानेनेते ज्ञानज्ञेयमुद्दा
नीज्ञानमुच्यते अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवं आचार्योपासनं शौचं मौनमात्मविनिग्रहः ७ इंद्रियार्थे-
षु वैराग्यमनहंकार एव च जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं ८ असक्तिरनभिष्वंगः पुत्रदारगृहादिषु
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ९ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी विविक्तदेशसेवित्वमरति-
र्जनसंसदि १० अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ११ अनन्ययोगेन
वि परमात्मनो मदेशादन्यदपरं किंचिन्नास्तीत्यनन्यरूपो निश्चयः स एव योगस्तेन निश्चयेन मयि भक्तिरेतदेव सा
न कदाचिद्व्यभिचरति व्यभिचारहेतुत्वाभिमतानां कामनानामभावात् तासामपि वा विद्य[illegible] ब्रह्मैतत्स्वरूपाणां
न देकमयत्वात् एवं सर्वत्रानुसंधेयम् एतद्विपरीतमज्ञानं यथामानित्वादीनि ११ एतेन ज्ञानेन यज्ज्ञेयं तदुच्यते ॥
ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते १२ सर्वतः पाणिपादं तत्सर्वतोऽक्षि

शिरोमुखम् सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितं असक्तं सर्व
भृच्चैव निर्गुणं गुणभोक्तृ च ॥ बहिरन्तश्च भूतानामचरं चरमेव च सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत् ॥ अ
विभक्तं च भूतेषु विभक्तमिव च स्थितम् भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ ज्योतिषामपि तज्ज्योतिस्तमसः प
रमुच्यते ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः मद्भक्त एतद्विज्ञाय मद्
भावायोपपद्यते ॥ अनादिमत्परं ब्रह्मेत्यादिभिर्विशेषणैर्ब्रह्मस्वरूपादेव प्रागुपादकं सर्वमवादीत् तदभिद्धितवि
ज्ञानात्कृष्णभावं कथयति एतानि च विशेषणानि पूर्वमेव व्याख्यातानीति किं निष्फलया पुनरुक्त्या एतत्
क्षेत्रं ज्ञानं ज्ञेयात्मकं त्रयं यो वेत्ति स मद्भक्तः स च मद्भावमेति १९ एतल्लक्षणं कृत्वा परीक्षा क्रियते प्रकृ
तिं पुरुषं चैव विद्ध्यनादी उभावपि विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥ कार्यकारणकर्तृत्वे हेतुः प्र
कृतिरुच्यते पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ प्रकृतिरप्यनादिः कारणान्तराभावात् विकाराः
पटाः दयः प्रकृतिरिति कार्यकारणभावे हेतुः पुरुषस्तु याथात्म्याज्ज्ञो भोक्ता २१ पुरुषः प्रकृतिस्थो हि भुं
क्ते प्रकृतिजान्गुणान् कारणं गुणसंगोऽस्य सदसद्योनिजन्मसु ॥ उपद्रष्टानुमंता च भर्ता भोक्ता महेश्वरः पर
मात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः २२ य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह सर्वथा वर्तमानोऽपि न स भूयो॥

भिजायते २४ ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना अन्ये सांख्येन योगेन कर्मयोगेन चापरे २५ अन्ये त्वेवमजाना
न्तः श्रुत्वान्येभ्य उपासते ते पि चातितरन्त्येव मृत्युं श्रुतिपरायणाः २६ प्रकृतिः पुरुषयोः पृथक्त्वे एव किलान्योमाये
त्याहृतिः अतएवास्य शास्त्रकृद्भिर्नानाकारैर्नामभिरभिधीयते तद्रूपमुपदेष्टमादिभिः अयमत्रतात्पर्यार्थः प्रकृ
तिस्तद्विकारश्च तदेषां विधः सर्गः तथापुरुष एव तत्सर्वमनादिनिसंवद्धत्तलततन्ताकृतिर्न निसतिनिदनत्पनात त
थावाह यएवं वेत्ति पुरुषं प्रकृतिं च गुणैः सहेति एवमनेन सर्वाभेदरूपेण व्रत्तदर्शनेन योयोगी प्रकृतिपुरु
षं गुणांश्च न तद्विकारां जानाति स सर्वेण प्रकारेण यथा तथा वर्तमानोपि मुक्त एवेत्यर्थः इह केचन ज्ञानप्रधाने के
श्चित्समतयोपासते अन्यैः प्रागुक्तेन सांख्येन योगेन अपरैः कर्मणा इत्येवं पिस्वयमीदृशं ज्ञानमजानन्तिरपि
श्रवणगुरुतोथवा श्रुतमेवोपास्यते ते पि संसारं तरन्ति येन केन विद्धपायेन भगवत्तत्त्वमुपास्यमानमुत्तार
यमतः सर्वथैवमासीनेत्युक्तम २६ यावत्संजायते किंचित्सत्त्वं स्थावरजंगमं क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरत
र्षभ २७ समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति २८ समं पश्यन्हि सर्वत्र सम
वस्थितमीश्वरम् न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् २९ यत्किंचिच्चरमचरं च तत्सर्वं तत्त्वज्ञातिरेकिन
संभवतीत्यत एव सर्वत्रैव समवस्थितो योगी आत्मानेन न हिनस्ति उत्तरे संसारार्णवे पातयति ३० प्रकृत्यैव च कर्मा

णि क्रियमाणानि सर्वशः यः पश्यति तथात्मानमकर्तारं स पश्यति २९ यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ३० अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः शरीरस्थोऽपि कौन्तेय न करोति
न लिप्यते ३१ यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ३२ यस्माद्दृ
शोऽस्थिरस्तरां बुद्धिर्भवति प्रकृतिरेवेदं करोति नाहं किंचिदिति समस्तं कर्माणोऽपि न करोति एवमकर्तृत्वे या
दिवाविस्तीर्णत्वेन सर्वव्यापमात्मा यदा भूतानां पृथक्त्वं विभक्तानामात्ममेव पश्यति आत्मन एव चोदितो नाम सतेतनदा
पि सर्वकर्तृत्वान्न लेपभाक् यतोऽसौ परमात्मेव शरीरस्थोऽपि न लिप्यते आकाशवत् ३३ यथा प्रकाशयत्येकः
कृत्स्नं लोकमिमं रविः क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ३४ नन्वेकः परमात्मा कथमनेकानि क्षेत्राणि
व्याप्नोतीमां शंकां प्रसिद्धेन रविना दृष्टान्तेनापाकृता कृत्स्नं क्षेत्रं चराचराणि क्षेत्राणीमर्थः ३५ क्षेत्रक्षेत्र
ज्ञयोरेवमन्तरं ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ३६ एवमध्यायेन यदुक्तं क्षेत्रक्षेत्रज्ञ
योरन्तरं भूतप्रकृतेश्च सत्त्वादिगुणमयधर्मत्वान्मोचनं तच्चैतज्ज्ञानलक्षणेन सर्वत्रावस्थितेन नालौकिकेन चक्षु
षा ये पश्यन्ति ते वासुदेवत्वं प्राप्य लभन्ते परमं शिवम् ३५ स एष देवः प्रमात्मकृतिविशेषभेदः संसृष्टचेतसाम्
परिसरणोस्तु ममैते निर्मलात्ममयं जगत् श्रीभगवद्गीतासु क्षेत्रक्षेत्रज्ञयोगो त्रयोदशोऽध्यायः १३ श्रीभगवानुवाच प

रंभूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमं यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः १ यद्देवं पूर्वोक्तेन ज्ञानेन तदेव पुनः प्रका
र्वेणाश्रमेके गुणस्वरूपनिरूपणाय वैतमेनवक्ष्यामि यज्ज्ञात्वेमनेनात्मज्ञानस्य हृत्प्रसयतो मसिद्धिं चाह १ इदं ज्ञा
नमुपाश्रित्य मम साधर्म्यमागताः सर्गेपि नोपजायन्ते प्रलये न व्यथन्ति च २ वक्ष्यमाणं ज्ञानमस्कोदसमाति प्रसयः एवमन
ज्ञापि स्थितिसमयेप्वाद्यं २ तत्रादौ संसृतेः क्रममाह ॥ मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहं संभवः सर्वभूतानां
ततो भवति भारत ३ सर्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ४ ह्यात नव्येज्ञा
तेन त्वकारणेन च सकरेदिदाने ममतावदव्यपदेश्यपरमानेदृष्टपसमदहृत्लहेदकाल्मीयशक्ति दृश्यमानेजाये
त एवमः प्रकाशादयः क्रमेणोत्तमो विवृद्धावाविर्भवन्ति २३ यदा सत्त्वे विवृद्धे तु प्रलयं याति देहभृत् तदोत्तमवि
दां लोकानमलान्प्रतिपद्यते रजसि प्रलयं गत्वा कर्मसंगिषु जायते तथा प्रलीनस्तमसि मूढयोनिषु जायते।
यदा सत्त्वे एव जन्मनान्तवरतसात्त्विकव्यापाराभ्यासात्सत्त्वे विवृद्धे भवति तदा प्राप्तप्रलयस्य शुभलोकावाप्तिः ए
वं जन्मान्तरराजसकर्मणाः प्राप्तिर्हि मिश्रोपभोगायमानुष्याप्तिः तथा तेनैव प्रकारेण यदा सत्त्वे एव जन्मनातो
मसस्येव कर्माभ्यस्तेन तदानस्य कतिर्यगादिदेहेषु संभवते येन त्व्याचत्तनेमरणकाल एव सत्त्वादौ हृद्धे एतानि फ
लानीति तेन सत्त्वमकर्मकारी ते तु भवेत्प्रहृष्टाः यतः सर्वमेव सर्वथा सत्त्वगुणमाहत्यैवोपजायते अप्रसत्याचर्यायां च सा

द्रूपेणात्मनीयामेवदिविमर्षशक्तिमालेख्याद्दिमनादीनात्मानगुणदार्थ्यैसंसारयामि अतएवसर्वासुयोनिष्टा
धिकारणतयाहेहिकाभगवच्छक्तिः सकलसंसारवमनस्वभावामाता पिताहं देशक्तिमानव्यपदेश्यः ४ सत्व
रजस्तमइतिगुणाःप्रकृतिसम्भवाः निबध्नंतिमहाबाहोदेहेदेहिनमव्ययम् ५ देहीचात्ममात्मनयासत्वरज
स्तमोभिर्धर्मैरपवर्गपर्यन्तायमोगायनिवध्यते ५ तत्रसत्वंनिर्मलत्वात्प्रकाशकमनामयम् सुखसंगेन
बध्नातिज्ञानसंगेनचानघ ६ रजोरागात्मकंविद्धितृष्णासंगसमुद्भवम् तन्निबध्नातिकौन्तेयकर्मसंगेनदेहि
नाम् ७ कर्मोणोवानुपश्यते सत्वेनिर्मले तृष्णासंगसमुद्भवोयतः ७ तमस्त्वज्ञानजंविद्धिमोहनंसर्वदे
हिनाम् प्रमादालस्यनिद्राभिस्तन्निबध्नातिभारत ८ उल्लंभस्यापिविरतसेवितगुणशतलब्धस्यापवर्गमा
र्गोवककारणस्यमानुष्यकस्यव्यर्थ्यानिवादनंप्रमादः तथ्यापुक्रम आग्रहः लगणयकोपसंवरलैनेल
भ्यते सद्द्यानीयतेयेनसत्प्रमाधीनत्वायमइति आलस्यंशुभकरणीयेषु निःशेषेणाक्षणाकृत्स्निताणा
तिर्निद्रा ८ सत्वंसुखेसंजयतिरजःकर्मणिभारत ज्ञानमावृत्यतुतमःप्रमादेसंजयत्युत ९ संजयतियोजय
ति ९ रजस्तमश्चाभिभूयःसत्वंभारतवर्धते रजःसत्वंतमश्चैवतमःसत्वंरजस्तथा १० रजस्तमसीअभिभूयस
त्वंवर्धते रजस्तुसत्वतमसी तमःसत्वरजसी अन्योन्यमाभिभवनगुणहानिरिति १० सर्वद्वारेषुदेहे

गी॰ सं॰ ५८

49

स्मिन्प्रकाश उपजायते ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥ लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृ
हा रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥ अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च तमस्येतानि जायन्ते विवृ
द्धे कुरुनन्दन ॥ सर्वद्वारेषु सर्वेन्द्रियेषु लोभप्रहिकाः कर्मणो वा रजस्युद्रिच्यमाने जायन्ते एवमप्रकाशादयः क
र्मणो वृत्तमो विवृद्धावाविर्भवन्ति १२ यदा सत्त्वे विवृद्धे तु प्रलयं याति देहभृत् तदोत्तमविदां लोकानमलान्प्र
तिपद्यते ॥ रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ यदा सत्त्वप्रयेणैव
जन्मनानवरतं सात्त्विकव्यापाराभ्यासात्सत्त्वे विवृद्धे भवति तदा प्राप्तलयं मृत्युं लोकावाप्तिः एवं जन्माभ
स्ता राजसकर्मणः प्रयाणाद्धि मिश्रोपभोगाय मानुषाप्तिः तथा तेनैव प्रकारेण यदा सत्त्वमग्रेण जन्मना तामस
मेव कर्माभ्यस्तेन तदा नरकतिर्यग्गत्वादिदेहस्वत्त्याप्यते येन यावत्तेन मरणकाल एव सत्त्वादीनां वृद्धयस्तानि फ
लानीति तत्र प्रकारान्तरेणु भेवमुपद्रष्टुः यतः सर्वस्यैव सर्वेष्वां मरणमोहं एवोपजायते अस्तह्याख्यायेव
मेवादीनीमानि स्लोकान्तराणि १५ कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् रजसस्तु फलं दुःखम
ज्ञानं तमसः फलम् ॥ सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ ऊर्ध्वं गच्छ
न्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥ नान्यं गुणेभ्यः कर्तारं यदा द्र

नुपश्यति गुणेभ्यश्च परं वेत्ति मद्भावं सोधिगच्छति १९ गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् जन्ममृत्युजरा
दुःखैर्विमुक्तोमृतमश्नुते २० अत्र केचिद्देहस्थाः लोकाः कलिताः पुनरुक्तमानेनाज्ञापव एतद्गुणातीत इति
लक्षणो मोक्षायैव कल्प्यते २० ननु यदि देही कथं गुणातीतो भवति सर्वथैव देहिकयाचिचिन्तमहमावृत्तेते सावत्रे गुणा
दृश्यतमाः वशं भवति अनेनाभिप्रायेन पृच्छति कैर्लिंगैर्विमादिं अर्जुन उवाच कैर्लिंगैस्त्रीन्गुणानेतानतीतो भव
ति प्रभो किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते २१ अनेनार्थः श्रीभगवानुवाच प्रकाशं च प्रवृत्तिं च मोहमे
व च पाण्डव न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति २२ उदासीनवदासीनो गुणैर्यो न विचाल्यते गुणा वर्तन्त
इत्येव योवतिष्ठति नेङ्गते २३ समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसं
स्तुतिः २४ मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः सर्वारम्भपरित्यागी गुणातीतः स उच्यते २५ अत्र प्रकाशा
दिषु सर्वेषु यथेषु वर्तनेन यापि योगिनस्तेषु प्रकाशादिषु न द्वेष्टि नहेयवर्तते भवतित्यापि न केवल पिण्डयमेव
यैतस्थितानमोसोभयितमलमिति मन्वाना गुणातीता भवन्ति अत एवाह यः अन्तो निर्विवेकस्तिष्ठति स एव
ज्ञः सम्यग्ज्ञानात् तथा दिनैङ्गतेन स्वरूपाच्च्यवते अत्र चोपायः सर्वेषामारंभाणां शरीरारंभकेन्द्रियादिस्वभावप
वयत्नवर्तनेन तत्फले किंचिदिदं ममभिमन्त्यथ इति स्थिरा बुद्धिः २५ मां च योऽव्यभिचारेण भक्तियोगेन सेवते स गु

णान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च शाश्वतस्य च धर्मस्य सुखस्यैका
न्तिकस्य च २७ अनेन मूलभूतमुपायमुपदिशति मां चेति च शब्दोवधारणे यो मामेव सेवते अनेन फलादिसाकांक्षताभा
सेन गत्वेनाश्रयति फलेष्वधानतयेति निरस्तः अतएव नाम्नाव्यभिचारिणी भक्तिः फले प्रतिसमावाम्यावानितिः
यस्तु फले किंचिदप्यनभिलष्यन्किमेतस्लोकमनुतिष्ठामीति पर्यनुयुज्यमानोपि निरंतरभगवद्भक्तिमान्विदु
तोतकरणतयाकेवलकितरोमवान्नेयमानतनुर्विस्फारितनयनयुगलपरिवर्तमानसलिलसंपातस्तूष्णींभावे
नैवोत्तरंप्रयच्छति सएवाव्यभिचारिण्या भगवतो महेशस्यानुग्रहशक्त्याभन्नयापवित्रीकृतो नाम इति ज्ञेयम् अह
मेव ब्रह्मणः प्रतिष्ठा मयि सेव्यमाने ब्रह्म भवति अन्यथा जडत्वमपत्याद्ब्रह्म सेव्यमाने मोक्षमपि सोयुक्तादविशि
ष्टमेव प्रापयेत २७ संग्रहश्लोकः लसद्भक्तिरसावेशाद्दीनादेकाद्विभ्रमः स्थितेपि गुणसंमर्दे गुणातीतसमोय
तिः श्रीभगवद्गीतार्थसंग्रहे चतुर्दशोध्यायः १४ श्रीभगवानुवाच ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्य
यं छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् १ अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः अधश्च मू
लान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके २ न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा अश्वत्थमे
नं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्वा ३ ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः तमेव चाद्ये

पुरुषंप्रपद्येयतः प्रवृत्तिः प्रसृतापुराणी४ निर्मानमोहाजितसंगदोषा अध्यात्मनित्याविनिवृत्तकामाः द्वंद्वै
र्विमुक्ताः सुखदुःखसंज्ञैर्गच्छंत्यमूढाः पदमव्ययंतत् ५ अनेनशरणागतेरेवयदुच्यतेअसर्वार्थः सर्वेसर्वोपासनी
यस्मादि तस्यभगवद्भक्तोपासनातात्पर्यमित्युच्यते मूलेप्रशोतेरूपेणहृद्येहिनिवृत्तसक्ततताभिः कुंठासिसा
णीनीसेवयथाहरसमानत्वफलत्वसस्ततास्यः पर्णाः हूयेते एवंब्रह्मतत्तस्यवेदोपलक्षितशास्त्रद्वारि
कामनीतिविनाख्यायते गुणैः सत्वादिभिः प्रवृद्धादेवादिरूपावशांततया तस्यचशुभाशुभात्मकानिकर्मा
णिपत्रस्तत्त्वत्वानितेक्रियत्वेनविशेषक्रियाभिधीयमानत्वसामर्थ्याद्विशेषणपरमुपायते देहीप्रेष्या
नत्वनुद्यादितिविधिवत् नेनार्थोऽयत्नानिमित्तामसक्तियादिति तमहंप्रशोतेऽव्ययंपदंतदेव ५ नतद्भा
सयतेसूर्योनशशांकोनपावकः यद्गत्वाननिवर्तंतेतद्धामपरमंमम ६ सूर्यादीनांतत्रानवकाशः तेषां
कालाद्यनवच्छेदात् वेद्यत्वाकरणोपकारकत्वात् तस्मात्दिक्कालाद्यनवच्छेदाद्देशकत्वात्करणा
प्रवर्तकत्वात्तदतीतत्वात् ६ ममैवांशोजीवलोकेजीवभूतःसनातनः मनःषष्ठानींद्रियाणिप्रकृतिस्था
निकर्षति ७ शरीरंयदवाप्नोतियच्चाप्युत्क्रामतीश्वरः गृहीत्वैतानिसंयातिवायुर्गंधानिवाशयात् ८ ब्रह्म
णोपवायसेशस्यमज्ञानयर्मेतयापरिसर्गास्ससंवेदनास्येतनतोनिहमेस्यांशतमुपचरितंभवंस्ततोशावमे

पपद्यते यदेहेपि ब्रह्मणः सार्वद्रूप्यमनतिक्रान्त इति स्फुतेः एषोवचौपचारिकत्वाद्यथावसरं योजनीयेति नव
तिपन्नं यवाप्नोति यदुत्क्रामति उत्क्रामति संजति एतैः सह यथा वायुः सर्वगतो विश्रान्तिधाम पार्थिवं प्राप्यत
तो गन्धमानीय स्थानान्तरे तन्निहितान् एव संक्रामति एवं जीवः पुर्यष्टकेन सह एवं स्वष्टो संस्कारैश्चैतैः सादि
त्यमस्योत्क्राम्य स्थितान् अपि स्थानान्तरमनादित्रूपायो विषयग्रहणात्मिकायां तत्स्वहितै स्वैवास्य व्यापार
इति निर्णीयते ८ श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च अधिष्ठाय मनश्चायं विषयानुपसेवते ९ उत्क्रा
मन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः १० यतन्तो योगिनश्चैनं प
श्यन्त्यात्मन्यवस्थितम् यतन्तोप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ११ मनश्शमेनेनोत्तरकारणमुपलक्ष्यते अत एव शा
रीरस्थितियोगोऽपि तिष्ठन्ते शारीरान्तरग्रहणायोत्क्रामन्ते विषयान्वा भुञ्जाने मूढा न पश्यन्त्यसम्बुद्धत्वात् प्रबुद्धा
स्तु सर्वत्रैव बोधरूपमनुसन्धानाज्ज्ञानेनैव स्वत्वमसमादयन्तेऽवधानपरत्वात् अकृतात्मनोऽयत्नतोऽपि न फ
लाय परिपक्वकषायत्वात् न हि शरदि सलिलादिसामग्रीसमर्देऽपि धान्यबीजान्युप्यमानानि फलसम्पदे ले
अत एव साम्यमेव साम्यं न भवति यमन्देव किल मधुमाससंभृतजलधरपटलीभेदितमेभः कान्येव वसाभू
यसां शिशिरविवशीकृतानां रविकरस्पर्शैनैव कान्तिः एवमकृतात्मनो यत्नो न सकलोऽगपरिपाककृतो

मायाति अत एव भाष्यकारैरपरमेश्वरदीनादियेन यथाविधक्रोधमोहादिग्रंथिसन्दर्भगर्भीकृतो न ईशस्तेष
पापएव साकल्येन भजतीति मित्यर्थः तदुक्तं क्रोधादौ हृष्यमाने हृदीदित्तो पिनमुक्तिभागिति ११ यदादित्यग
तंतेजो जगद्भासयतेऽखिलम् यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं १२ गामाविश्य च भूतानि धारयाम्यह
मोजसा पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः १३ अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः प्राणा
पानसमायुक्तः पचाम्यन्नं चतुर्विधम् १४ अर्कादितेजस्त्वस्य तद्रूपतया दशमाध्याये उक्तविभूतिस्थितेः संहारा
प्रकटीकरणे श्रीगुरवः प्राहुः भूतपंचकस्य समस्तव्यस्ततया धलोकधारकत्वेन तद्गत एव मोहस्थये मि
त्यन्तरं तेन तथा हि रवितेजसः प्रकाशकत्वेन धारकत्वेन च तेजो धराद्यन्तानामात्मत्वेन तदुक्तं यदादित्यगतमिति गा
माविश्य च भूतानीति चार्धद्वयेन वायोस्तेजसः प्रकाशकत्वेन पोषकत्वेन च जलस्य तेजोयोगात् तदुक्तं यच्चंद्रमसीत्यनेन अ
गेन पुष्णामीति चार्धश्लोकेन वायोस्तु तेजसः प्रकाशनपोषणदहनसेदनपवनात्मकं पृथिव्यां तेजोवायुयोगात्
देतदिदमुक्तं यच्चाग्नावित्यनेन अहं वैश्वानर इति श्लोकेन च नवस्तु वा यथावकाशरूपतया सर्वगतमेव अत एव बो
ध्यरूपत्वात् ज्ञानदोषस्वरूपशब्दप्रतिनत्वानेऽप्यवाथ स्वभावमात्मानं परस्वभावं परमेश्वरस्वरूपं सर्वज्ञानस्वतंत्रं सर्व
कर्तारं दर्शयितुमाह सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च वेदैश्च सर्वैरहमेव वेद्यो वेदांत

गी॰
टी॰
५२
52

कृद्वेदविदेव चाहम ॥१५॥ सर्वस्य वेद्यस्य यद्यज्ज्ञानं मत्ताहरणं स्वतंत्रबोधस्वभावेन त्वाहमिति यो विमर्शस्तत एव ममैवाव
भासनामये ज्ञाने विश्वमहाद्यस्थिरूपमयेन्नपवेति सर्वात्मकभावस्वेदनासारे विकल्पनज्ञानात्मकमपोहनेन पा
शवस्थस्थिरूपमायामयममात्रचित्तस्वरूपं च सेस्कारशेषतो नीतमस्मेहृतमधुनरवभासनात्मकमितीयतासम
स्तज्ञानानि संहृतानीति सर्वज्ञता सर्वकर्तृत्वं च रूपकर्तृत्वमुक्तं सर्वेविति संभूय किल सर्वशास्त्राणां परमेशत
त्वमेव निरूप्यं वेदवेदान्तकर्तृत्वेन न कर्मफलतत्त्वं वा हिरण्यगर्भतया शेषविश्वनिर्माणतदुन्मूलनेन पुनः स्वरूप
प्रतिष्ठापनेन भगवत एव सान्तमिति विश्वकर्तृत्वमुक्तं अमेतत्पोहनममेनाक्रान्ते नेदं भवतीति व्यतिरेकबुद्धिः
वेदान्तकरोतीमात्मसाद्भावेन एवं वेदम ॥१५॥ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च क्षरः सर्वाणि भूतानि कूटा
स्थोक्षर उच्यते ॥१६॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः ॥१७॥ यस्मात्क्षरमती
तोहमक्षरादपि चोत्तमः अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥१८॥ यो मामेवमसंमूढो जानाति पुरुषोत्तमम
स सर्वविद्भजति मां सर्वभावेन भारत ॥१९॥ लोके द्वाविमौ पुरुषाविति ग्रंथेनेदमुच्यते लोके तावदप्रबुद्धस्वभावोपि
सर्वः पृथिव्यादिभूतारब्धं शरीरमात्मानं चेतनेतररूपं जानातीति लोकप्रसिद्धत्वात्तथा नैनिवर्तते अहंकृतलक
लाभग्राहीदं तथैवेति विभिन्नसकललोकव्यापकतया वेद्य इति क्षरमतीतो भूतानां जडत्वात् अक्षरमतीत आत्मा

नोयमबुद्धेनेसर्वव्यापकत्वखंडनात् पुरुषोत्तमेमेलोकेवेदेपिसडत्तमः पुरुषइत्यादिभिर्वाक्यैः सएवपरमात्माद्वय
एवमुच्यते एवंजानानः सर्वमयंमामेवब्रह्मत्वेनमुपासीतः सर्वमन्वयतेनविदन्सर्वेणभावेनमहर्निक्रियाङ्गा
नात्मकेनमामेवभजते यानगृयतितद्गवन्तःर्निनयेमादि तथाचमयैवशिवशक्त्याविनाभावेला
वे तवचकावनतस्ततिर्विकेसकलशब्दमयीकिलतेतनुः निखिलमूर्तिषुमेमवदन्वयोम
नसिजात्सवदिव्यसरासच इतिविविंमाशिवेषामिनाशिवेजगतिजानमयत्वंवशात्इदम् लति
जपार्चनचिंतनवर्जितानखलुकाचनकालकलापिमेइति १९ इतिगुह्यतमंशास्त्रमिदमुक्तंमया
नघ एतद्बुद्ध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारत २० गुह्यतमंसर्वाद्वयप्रतिपादकत्वात् एतदेवबुद्ध्वाबु
द्धिमतेनतत्त्ववस्तावबुद्ध्या एतेनचज्ञातेनैवकृतकृत्यतानन्यकृतेनापिशत्रुविजयार्थोदाहरणान्त्य
पञ्चमाहिना चक्रारोहणेसोनकः कृतेनदिकृतकृत्यताहेत्वापतेनतज्ज्ञातेनैवेतिविद्धि इतिश
ष्वेनशास्त्रसमाप्तिः हृचितावक्तव्यसपरिसमाप्तेतयासमाप्तत्वात् तथाहि षोडशाध्यायेनपिगू
सार्जुनस्यकेवलेयोग्यतामतिपादितेनयपदेशप्नेकिंचित् देवीहेवविद्यामपदास्त्वीचाविद्यामयी
तादृशीसमम् तंचविद्यामयीदेवीसम्पदममिमामश्रेनावतिनिद्दितामयम एवदृशाति मोक्षुवःस

गी॰
सं॰
५३

53

परं देवीमिति । अत एव सर्वैर्विद्याविद्यासंबद्धैर्निरूपणावसरे देवानामस्य ममकुलेन विद्याविद्ययोः सम
वेद्यनिरूपिते एवं शिवस्वरूपप्राधान्येन निरूपणात् अस्य गीतानामस्य अक्रमित्याध्याय इत्ययमभिप्रायः । इति
परे पालितत्पवपरिश्रमाणः सर्वभावेन हि परमेश्वरभजनमात्रपरायणत्वेन तदर्थं चामत्सर्वमितिसुकृतमा
क सर्वमाहेश्वरस्वरूपावेशात् एव हि परमे शिवम् २० संग्रहश्लोकः स्वतन्त्राद्वैतमहामोदस्फुरत्तामात्रलक्षमयी वि
तिम् लौकिकेष्ववद्वारेष्वपि पुनर्निर्विशेत् समाविशेत् ॥ श्रीभगवद्गीतार्थसंग्रहे पंचदशोऽध्यायः १५ एतद्
द्वेष्यमत्र बोधस्य नाम स्फुरति मयत्तानां न रमितं इति स्थिते मिते एवं भूतं युक्तिं विना मयत्तानां न रमितं इति स्थिते मि
ते एवं भूतं युक्तिं विना मयत्तानां देयेन विचारविमर्शे परामर्शादि द्वेषेणाविजातीयम् अज्ञानविरहितत्वेन ज्ञाना
नाम यत्र स्वभावत्ता कार्यविज्ञानलाभे सति भवति न तु ध्याने विमृष्टेव्यविमर्शेनान्यथा यथेष्ठं स्फुरितं तथाऽकृतिविति न
अस्फुरति मयेत्तानेन गुरुशास्त्रे एव प्रयासेन न सम्भवतः युक्तिं विना भावनां मयेत्तद्विमर्शेत्वमनात्मयात्मया
विषयगुणानेन मत्त्वथा न भूता अतोऽर्जुन स्वात्मने वामा विमर्शभिप्रायेणावस्य माणो विस्पष्टेषेतद्दितिवाक्यं स
निवेशे कर्तनैवपरिकरबन्धयोजनाभिप्रायेणादम् भगवानुवाच ॥ अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥१॥ अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् । दया भूतेष्वलो

त्यंचमार्दवंह्रीरचापलम्२ तेजःक्षमाधृतिःशौचमद्रोहोनाभिमानिता भवंतिसंपदंदैवीमभिजातस्य
पांडव३ दंभोदर्पोभिमानश्चक्रोधःपारुष्यमेवच अज्ञानंचाभिजातस्यपार्थसंपदमासुरीं४ दैवीसंपद्वि
मोक्षायनिबंधायासुरीमता माशुचःसंपदंदैवीमभिजातोसिपांडव५ आसुरभागमनंत्रिविधानामा
सीकिलाविद्यासामहद्वयादिवांशुशादिरूपाविद्यावध्यतेइतिवस्तुस्वभावएव नेवविद्यात्मानेदिव
मंशोसात्विकमभिमपन्नस्तस्माचोतरीमोहलक्षणामविद्यांविलयवाह्यविद्यात्मशत्रुहननलक्षणां
प्राप्नोषियथापरमतुतिष्ठेमध्यायार्थः तथाहिदिवांशशमसमानिविद्यानितानिष्कृष्टमेवाभिलष्यते
इंद्रियजयः चापलेसर्वोपरमविमर्शरूपकरणेनदाभावोचापले तेजआत्मस्फुरत्नादयदत्तोनमितता
यकरणं दैवीसंपदेशामाचनवमोक्षायकामनापरिहारान आतस्तुशोकमामापःयथाधायादीन्
त्वाकथंत्ररवमश्रुवीयेति शिष्टस्ये६ द्वौभूतसर्गौलोकेस्मिन्दैवआसुरएवच दैवोविस्तरशःप्रो
क्तआसुरंपार्थमेशृणु६ पूर्वादेवीसंपतृक्ता६भयमित्यादिना६ आसुरीमाह॥ प्रवृत्तिंचनिवृत्तिंचजना
नविदुरासुराः नशौचंनापिचाचारोनसत्यंतेषुविद्यते७ असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरम् अपरस्पर
संभूतंकिमन्यत्कामहैतुकं८ एतांदृष्टिमवष्टभ्यनष्टात्मानोल्पबुद्धयः प्रभवंत्युग्रकर्माणःक्षयायजगतो

गी॰
सं॰
५४

54

शुभाः ॥९॥ काममाश्रित्य दुःपूरं दंभमानमदान्विताः असमद्ग्राहाश्रिताः क्रूराः प्रवर्त्तंतेऽशुचिव्रताः ॥१०॥ चिंता
मपरिमेयां च प्रलयांतामुपाश्रिताः कामोपभोगपरमा एतावदिति निश्चिताः ॥११॥ आशापाशशतैर्बद्धाः का
मक्रोधपरायणाः ईहंते कामभोगार्थमन्यायेनार्थसंचयान् ॥१२॥ इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथं
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥१३॥ असौ मया हतः शत्रुर्हनिष्ये चापरानपि ईश्वरोहमहं भोगी सि
द्धोहं बलवान्सुखी ॥१४॥ आढ्योभिजनवानस्मि कोन्योस्ति सदृशो मया यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानवि
मोहिताः ॥१५॥ अनेकचित्तविभ्रांता मोहस्यैव वशंगताः प्रसक्ताः कामभोगेषु पतंति निरयेशुचौ ॥१६॥ आत्मसंभा
विताः स्तब्धा धनमानमदान्विताः यजंते नामयज्ञैस्ते दंभेनाविधिपूर्वकम् ॥१७॥ अहंकारं बलं दर्पं कामं क्रो
धं च संश्रिताः मामात्मपरदेहेषु प्रद्विषंतोभ्यसूयकाः ॥१८॥ तानहं द्विषतः क्रूरान्संसारेषु नराधमान् क्षि
पाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥१९॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि मामप्राप्यैव कौंतेय
ततो यांत्यधमां गतिं ॥२०॥ त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्य
जेत् ॥२१॥ एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥२२॥ प्रकृतिः कृतर
दगुत्तममिति निश्चितिः कर्मत्यो येन इति किं विहस्थाद्यकार्यं विद्यते यन्नेति किंचित्के चिंतानेषां मला

योनाविरतं संहरति प्रलयाद्युपरमात् एतावदिति कामोपभोग एव परं कर्मेतन्मोक्षशास्त्रपरं क्रोधः अ
नएवह कामक्रोधपरायणाः इति अनेकचित्तविभ्रान्ता इति निश्चयाः भावात् अशुचौ निरये वीच्यादौ जन्ममर
णा संततानेव यज्ञैर्यजन्ते नाम निष्फलमित्यर्थः क्रोधेन हिंसेदं न पश्यन्तीत्यर्थः यज्ञा नाम यज्ञैः तेत्तामात्रे
णा यो यज्ञा अथवा नाममात्रेण प्रसिद्धार्थं यो यज्ञा येन यज्ञयाज्ययमिति व्यपदेशो जायते तेन दम्भेनैव काएव
नत्र फले तिरोधायादि श्रुयिति तत एव लोकान्हिंसन्तो मामेव द्विषन्ति अहं वा स्वदेवादि सर्वावासः आत्मनि
च देहे एवं तेन आत्मनो हं द्विषन्ति निरयपाते हेतुमुपायं निलो त्वाहमासुरीष्वेव योनिषु क्षिपामि यतः कामा
दिकं त्रिविधं नरकस्यैव द्वारं तस्मादेतत्त्रयं त्यजेत् २२ नचैतत्त्रयत्याग एव वचनमिति मनादरणीयमपि तु नादि शास्त्रम
नुसरणमेव श्रेयो भवतीत्याह यः शास्त्रविधिमुत्सृज्य वर्त्तते कामकारतः न स सिद्धिमवाप्नोति न सुखं न परां ग
तिं २३ तस्मात् शास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि २४ शा
स्त्रविधिं त्यजन् स्वमनीषयैव कार्याकार्यविचारे प्रवृत्तः प्रमत्तो नरकपाती तस्मादात्मबुद्ध्या शास्त्रम
नुसृत्य कार्याकार्यव्यवस्थामाकार्षीरित्यर्थः २४ संग्रहोत्र अर्वाचे स्वात्मबुद्ध्यैव कार्ये नैव विचारयेत्
किं तु शास्त्रोक्तविधिना शास्त्रबाधविवर्जनम् इति शिवम् श्रीभगवद्गीतार्थसंग्रहे षोडशोध्यायः १६

अर्जुन उवाच ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः तेषां निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः शा
स्त्रविधिमनालोच्य ये व्यवहारमाचरंति तेषां का गतिरित्यर्थः १ तदेवोत्तरं श्रद्धानुसारेणोच्यते श्रीभग
वानुवाच त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा सात्विकी राजसी चैव तामसी चेति तां शृणु तत्र चा
यमाशयः शास्त्रं नाम किल पुण्यपापाद्युचितबुद्धिः सर्वैककर्तृविहीनेन तथापरामर्शेदाच्छिरूपं बोधयत्तातेषा
देवहृद्घपरामृष्टेन तथा फलादिस्वभावं शुद्धं विमर्शविनिःछांद्वाक्यं परमार्थपरमब्रह्मत्वस्वभावस्तेनप्र
सतयोनतादेवथ स्वभावाद्बुद्धिः प्रमरपर्येनेमहत्त्वम प्रणावादिरूपाद्यवहारप्रसिद्धप्रवाहपरम्परापर्यंतो
यदाह न हि हेतौ वस्तूनि शीलेनेति तत्र सत्तपवहितावहितोपदेशाय कार्याकार्यविवेचके यत्र स्वभावत
एव सत्वातिरेकस्तु ऊर्मारहृदयस्तेनाचरिते शास्त्रितमेव अन्यस्त्वराजस्तमः कलुषीकृतः शास्त्रोक्त
मप्याचरन्नाचरति शास्त्रात्पूर्वकात्स्मैनानन्तुष्ठानात् शास्त्रं हि सत्ववतामेव फलवदिति शास्त्रमेवाह
यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् विद्या तपश्च शीलं च स तीर्थफलमश्नुते नाभ्यासे यतत्वान्न त
स्यास्याक्रातः परिमंककामक्रोधमोहेषु सफलं इति तां सर्वमध्यायसनेदैव तन्न्यत्नयंते स्पष्टार्थत्वाच्च
न विव्रियते केवले पाठविस्मृतिपरिनिवारणायैव लिख्यते २ सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत।

श्रद्धामयोयंपुरुषोयोयच्छ्रद्धःसएवसः ३ यजन्तेसात्विकादेवान्यक्षरक्षांसिराजसाः भूतान्प्रेतपिशाचा
श्चयजन्तेतामसाजनाः ४ अशास्त्रविहितंघोरंतप्यन्तेयेतपोजनाः दंभाहंकारसंयुक्ताःकामरागबला
न्विताः ५ कर्षयन्तःशरीरस्थंभूतग्राममचेतनम् मांचैवान्तःशरीरस्थंतान्विद्ध्यासुरनिश्चयान् ६ सत्वा
नुरूपमत्रसत्वशब्दःस्वभावपर्यायः अयंपुरुषआत्माश्रद्धयातन्मयापरोपरिवर्तिमावरूपेसंबद्धःसएवत
न्मयएवबोद्धव्यः अचेतनमविवेकिनात् मांचकर्षयन्तःशास्त्रार्थानुष्ठानात् अतएवतेस्तबुद्धिवि
वादिनोनपश्यन्तोऽसुराःपश्चन्नतामसाः ६ आहारोपिसर्वादिभेदात्त्रिधाश्रद्धावत्तथायज्ञतपोदाना
नितच्छृणुते॥ आहारस्त्वपिसर्वस्यत्रिविधोभवतिप्रियः यज्ञस्तपस्तथादानंतेषांभेदमिमंशृणु ७ आयुः
सत्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याःस्निग्धाःस्थिराहृद्याआहाराःसात्विकप्रियाः ८ कट्वम्ल
लवणात्युष्णतीक्ष्णरूक्षविदाहिनः आहाराराजसस्येष्टादुःखशोकामयप्रदाः ९ यातयामंगतरसंपू
तिपर्युषितंचयत् उच्छिष्टमपिचामेध्यंभोजनंतामसप्रियम् १० अफलाकांक्षिभिर्यज्ञोविधिदृष्टोयइ
ज्यते यष्टव्यमेवेतिमनःसमाधायससात्विकः ११ अभिसंधायतुफलंदंभार्थमपिचैवयत् इज्यतेविधि
तेयज्ञंराजसंचलमध्रुवम् १२ विधिहीनमसृष्टान्नंमन्त्रहीनमदक्षिणम् श्रद्धाविरहितंयज्ञंतामसंपरि

चलते ॥१२॥ यातयामायस्य मनः समाधायानिश्चयेनानुसंधाय दंभो लोके माममेवं विधं जानीयादिति विधि
हीनमिति शास्त्रोक्तक्रियाहीनं तदेवाह असृष्टान्नादिभिर्विशेषणैर्वितनुते ॥१३॥ देवद्विजगुरुप्राज्ञपूजनं
शौचमार्जवं ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥१४॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् स्वाध्यायाभ्य
सनं चैव वाङ्मयं तप उच्यते ॥१५॥ मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः भावसंशुद्धिरित्येतत्तपो मानस
मुच्यते ॥१६॥ आर्जवमृजुता अगोप्यविषयास्पृष्टता सत्यमिति सत्यं च सत्यपरिहृतं प्रियहितं मितं ननु क्रिय
ते प्रियं च तत्कालेऽहितं च कालान्तरे इति वाक्यं सत्यमित्युच्यते तच्च यथाहृतकथनमात्रे भाव आशय
स्तस्य सम्यक् शुद्धिः ॥१६॥ श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः अफलाकांक्षिभिर्युक्तैः सात्त्विकं परिच
क्षते ॥१७॥ सत्कारमानपूजार्थं तपो दंभेन चैव यत् क्रियते तदिह प्रोक्तं राजसं चलमध्रुवं ॥१८॥ मूढग्राहेणात्म
नो यत्पीडया क्रियते तपः परस्योत्सादनार्थं वा तत्तामसमुदाहृतं त्रिविधेपि तपसि श्रद्धा सात्त्विकस्य हि
तत्त्वेव श्रद्धा राजसस्य तत्र जसिद्धं भावादेव श्रद्धा तामसानिष्टस्य पुनः परोत्सादनादावेव श्रद्धेति त्रिवि
धमपि तपः श्रद्धयोपेतमित्यनुविदाह ॥१९॥ दातव्यमिति यद्दानं दीयतेऽनुपकारिणे देशे काले च पात्रे
च तद्दानं सात्त्विकं स्मृतं ॥२०॥ यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः दीयते च परिक्लिष्टं तद्राजसमि

निरूपितम् २१ अदेशकाले यद्दानमपात्रेभ्यश्च दीयते असत्कृतमवज्ञातं तत्तामसमुदाहृतम् २२ दातव्यं दद्या
दिति नियोगमात्रेण पालनीयमिति दोषाभिसंधानाय परिक्लिष्टमिति दोषात् दानस्यासत्करणेन तस्य प्र
दानादिसत्करणात् एवं लौकिकानां सात्त्विकादित्रिप्रकाराशयानुसारेण क्रियाव्याख्याता २२ इदानीं
येगुणत्रितयसैकदेशीनीपिथियत्नक्रियाकथमाचरेन्नीतितात्कल्पप्रकार उच्यते २२ ॐतत्सदिति निर्देशो ब्र
ह्मणस्त्रिविधो मतः ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा २३ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् २४ तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः दानक्रियाश्च विविधाः
क्रियन्ते मोक्षकांक्षिभिः २५ सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ गीयते २६
यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते कर्म चैव तदर्थीयं सदित्येवाभिधीयते २७ ॐतत्सदित्येभिस्त्रिभिः
शब्दैर्ब्रह्मणो निर्देशः स्मृतः सर्वोत्कर्षेण तत्र ॐ इत्यनेन शास्त्रार्थीयमादौ सर्वधर्मारम्भकार्य इति सूच्यते।
तदिति सर्वनामपदेन सामान्यमात्राभिधायिना विशेषपरामर्शमात्रासमर्थेन फलानभिसंधानेन ब्रह्मणश्च
तेषामभिसंधानस्य विशेषपरिग्रहमन्तरेणाभावात् सकलविशेषानुग्राहित्वेऽपि सकलफलसंधानेन सर्वकर्तृ
त्वाद्यमपि विशिष्टफलायोगात् सदिति सद्यायाम्रमाप्रशस्ताभिधीयते क्रियमाणमपीदं यज्ञादिकर्म प्रमि

तिवृत्त्या क्रियमाणेनाभसत्तामेति विशिष्टफलाभिसंधानेन च क्रियमाणेन च सत्त्वेन यथायथकमिति
तस्मात्कर्तव्यमितिमत्वानाध्यज्ञादि कुर्वाणोऽपि न बध्यते अनेनैवाभिप्रायेणाद्विपर्यय उक्तं तपोनकल्को
ऽध्ययनेनकल्कः स्वाभाविको वेदविधिर्नकल्कः प्रसह्य वित्ताहरणं न कल्कस्तामेव भावापहृतानि कल्कइ
ति कल्कोवेधकः स्वाभाविकश्च निजाचरणेन निष्कारणं षडंगो वेदोध्येतव्यमिति प्रसह्य शास्त्रलोके
प्रसिद्धया चेष्टया भावेन सत्त्वादिगुणत्रययोगिना विमेनोपहृतामेतामेव वेधकानि नामद्ध्येनितानामर्थम् अतो
यज्ञादियावक्करीरभावितयाकार्यमेव नदर्थ्यं हितमकर्मप्रजेनादि यदिवाऽहमिमनेन समुपशांतसमस्त
प्रपंचे तदिमनेनोद्भिद्यमानविश्वतरंगपरामर्शमात्रात्मके ज्ञानस्वातंत्र्यस्वभावे सदिमनेनेच्छास्वातंत्र्यभर
विजृंभमाणवेपकं भेदकं प्राणेनेपितावस्थित्रस्वभावतयाभवनमितिप्रतिपाद्यते तथा चोक्तं सद्भावेसा
धुभावे चेति तेन परमप्रशांते रूपे प्रस्फुरति दिक्सामायिकतातितत्त्वात्मके ज्ञाते रंगसंगते च मध्ये स्फुरतस्ता
नयज्ञनपः क्रियाकारककलापपरिशोणीयज्ञमेव शुरिद्मलसितमेन तत्त्वलसमत्रितयमनर्गलस्वा
भाविकं रूपमितिकस्यकं कथं कुतः केन फले स्यादिति २१ इदानीमश्रद्धावतः तामसकर्मसर्वश्रेयवति।
ष्फलेकारककलापसंयोजनसमुपजनितप्रयासमात्रफलमेवेति सर्वथाश्रद्धावतानभाव्यमित्युच्यते

अश्रद्धयाहुतं दत्तं तपस्तप्तं कृतं च यत् असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह असदित्यप्रशस्तं तस्मात्प्रश
स्ते कर्मणि यतमानानां सद्रूपेण भवतीति शिवम् २८ संग्रहोत्र सप्तकारकवेशः क्रियास्वेवाविशेषिणी त
थापि विज्ञानवतां मोक्षार्थे पर्यवस्यति श्रीभगवद्गीतार्थसंग्रहे सप्तदशोध्यायः १७ अर्जुन उवाच संन्या
सस्य महाबाहो तत्त्वमिच्छामि वेदितुम् त्यागस्य च हृषीकेश पृथक्केशिनिषूदन १ सर्वमुक्तं समागी
सच बुद्धिमानिति तथा स संन्यासी च योगी च न निरग्निर्न चाक्रियः इत्यादिभिः अतस्त्यागिसंन्यासिनोर्द्वयोः श्रवणाद्वि
शेषजिज्ञासोयं प्रश्नः १ अथोत्तरं श्रीभगवानुवाच काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः २ काम्यानग्निष्टोमादीनि सर्वकर्माणि सर्वेषां नित्यनैमि
त्तिककाम्यानां कर्मणां क्रियमाणानामपि फलमात्रत्यागः अत्र चाध्याये यदवशिष्टं वक्तव्यमस्ति तत्का
नैरेवतत्र भवद्भिर्भाष्यकृद्भिर्विनिर्दिष्टमिति किमस्माकं तत्र कृत्यार्थप्रकाशनमात्रं प्रतिज्ञानि
र्वाहणमात्राणां गुणनक्रमप्रदर्शनप्रयासेन २ तदेवैव विशेषनिर्णयाय मतान्तरमुपन्यस्यति ॥ त्याज्यं दोषवदि
त्येके कर्म प्राहुर्मनीषिणः यज्ञदानतपःकर्म न त्याज्यमिति चापरे ३ निश्चयं शृणु मे तत्र त्यागे भरतसत्तम
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ४ यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् यज्ञो दानं तपश्चैवा

पावनानि मनीषिणां ॥५॥ एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च । कर्तव्यानीति मे पार्थ निश्चितं मतमु
त्तमम् ॥६॥ नियतस्य तु संन्यासः कर्मणो नोपपद्यते । मोहात्तस्य परित्यागस्तामसः समुदाहृतः ॥७॥ दुःखमित्येव यः
कर्म कायक्लेशभयात्त्यजेत् । स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥८॥ कार्यमित्येव यत्कर्म नियतं
क्रियतेऽर्जुन । संगं त्यक्त्वा फलं चैव स त्यागः सात्विको मतः ॥९॥ न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते । त्या
गी सत्वसमाविष्टो मेधावी छिन्नसंशयः ॥१०॥ न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः । यस्तु कर्मफल
त्यागी स त्यागीत्यभिधीयते ॥११॥ दोषवद्धिंसादिसत्वात्पशुकेन फलेन संयुक्तेन सर्वं शुभफलमिति केचिद्भागो
विशेषमसंमेने सांख्यादयश्च । अन्ये तु मीमांसकैकान्तप्रविष्टाः कर्मत्यागो दिशास्त्रादवगमत इति तथा
तस्माद्वैदिके हिंसादि न येनेति कर्मत्वताशुभानि तानि हिंसैव न भवति न हिंसादि निःसामान्यशा
स्त्रस्य नत्रवाधनाक्षेप्यायेव न तु हिंसा फलांशे भावनाया अप्रमाणो न विधायक इति अन्यमन्यत्रादीन् हिं
सादि योगिनोऽपि न त्यजेत् शास्त्रैकशरणा कार्याकार्यविभागाः पण्डिताः इति मन्यन्ते न त्वयं निश्चयः श्री
गलदितनगुणस्तद्रूपवैचित्र्यात्त्यागस्यैव सत्वरजस्तमोमया चिन्नहन्याक्रियमाणस्य न तु शिष्टस्वभावाव
मासवस्त्वस्थिमास्तु त्यागो नाम परब्रह्मविदां सिद्ध्यसिद्ध्यादिषु समतया रागद्वेषपरित्यागेण फलत्यागः ।

विहितकर्मणां निवर्त्तने अत एव हा राजसेन तामसेन वा मार्गेण कृत्वा न किंचित्फलं सेवेत इति सात्त्विकस्य त्या-
गकृतात्म्यं पालनात्मकं फलं त्यक्त्वा गुणग्रामगृहस्थत्वेनैः सन्तत्यागवाचोशुक्तिस्तपयन्निमतौ ११
अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् १२ अत्यागिनो फल
मयाक्तो १२ अधुना ब्रह्मवादाख्यायामपि पंचत्वापि कर्मदेहेतु स्थितेषु वलादेवात्मो अविद्यायाः शुभाशुभस्य
त्वमेव सकलकर्त्तृभावभारमारोपयन्नतो निजयैव धियात्मानं बध्नेति न तव स्वस्थिर्न्यासमेवं यत्तदुपदिश्य
ते ११ पंचैतानि महावाहो कारणानि निबोध मे सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् १३ अधिष्ठानं तथा
कर्त्ता करणं च पृथग्विधम् विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमम् १४ शरीरवाङ्मनोभिर्यत्कर्म प्रारभ
ते नरः न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः १५ तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः पश्यत्यकृतबुद्धि-
त्वान्न स पश्यति दुर्मतिः १६ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमाँल्लोकान्न हन्ति न निबध्य-
ते १७ कृतान्ते निश्चीयत इति कृतान्तः सिद्धान्तः अधिष्ठानं विषयो देवस्सगजितं शुभाशुभम् पंचैतेष्वधिष्ठा-
नादयः सामग्रीरूपतां प्राप्ताः सर्वकर्मस्तु हेतवः अनेन तु अधिष्ठीयते तेन न सर्वकर्मेति बुद्धिगतं रजो लब्धं इति
केचित् शब्दास्त्वाविविदिषाविविदिषारूपपंचकपरिणामिकर्मयोगशास्त्रवाच्यमधिष्ठानं क्वचित्तय

गी. सं. ५९

59

त्वशब्देनोक्ते कर्त्ता तु संयथा तावत् बुद्धिलक्षणः करणमनश्चक्षुरादिवाक्समपिवत्त्वादिकेष्टाप्राणपानादि-
कादैवशब्देनयमोयमैः तम्मोचबुद्धिगताः सर्वेपि भावाइपत्तव्दिताः अनेन तद्विष्ठानमोक्षरमस्येत अकृता-
बुद्धिनादनिश्चितप्रकृत्तनयायः पुनर्न्हेकारविवियोगदाप्येन नाशक्तिपुक्तिशनशोधिगतेन कर्माणि करोति
न सवेयमाकस्तत्रबुद्धिनादिमाशयः १७ ज्ञानंज्ञेयंपरिज्ञाता त्रिविधा कर्मचोदना करणंकर्मकर्तेति त्रि-
विधः कर्मसंग्रहः १८ कर्मणिचोदनामहत्तीका तत्समयेयेप्राणमेवाथमात्रनिष्टत्वाज्ज्ञानंज्ञेयंज्ञातव्यमिति वा
च्यतीत दुष्टमेवसमङ्गहत्वात्त्रपेयफलाभिसंधानेनात्मीयकृत्यास्वीकरणं अदमेतद्दोव्येषतोमयाहन्तमिस्यैवं
रूपेणतस्मयेनयानिवेदेनावस्थेरकरणकर्मकर्तृशद्वाभिधेयत्वमाविष्टत्वात् अतोयोगिनामावेशाना-
स्तितेनानिविकरणादिगिरोप्रसंगोनास्ति अपितुज्ञानाधिमात्रप्रवर्तनार्थम् १८ अथैषां[illegible]णामपिमेते
येनगुणभेदाद्भेदंदर्शयितमाह ॥ ज्ञानंकर्मचकर्ताचत्रिधैवगुणभेदतः प्रोच्यतेगुणसंख्यानेयथावच्छृ-
णुतान्यपि १९ गुणानांसंख्यानेनि[illegible]योयत्रतत्रसांख्यीयकृतौतेत्स्थनादित्रिविधमुच्यतेयत[illegible]गुणवृत्तिसंगतिः
ज्ञानमिस्मेनेनज्ञानेक्रियायांचपुरस्कारंतद्विविधमुक्तं एवंकर्मेतिज्ञेयेकार्यंचकर्तेतिज्ञाताकर्ताचेति
तत्रसर्वभूतेषु[illegible]नास्तोकत्र्येयेणज्ञानकरणमप्येवंरूपमुक्तं अतएवयेनेतितत्रीयाह्यनावज्ञानकर-

णस्तामाभ्यस्य स्वरूपमुक्तं नियतमित्यादिना श्लोकत्रयेण कर्मणो ज्ञेयकार्यरूपस्य त्रैविध्यं मुक्तसंगइत्यादि
नात श्लोकत्रयेण कर्तुर्हि त्रूपस्य संक्षेपेण स्वरूपं करणविशेषस्य स्वरूपभेदश्रुतिपादनार्थं बुद्धेस्त्रैविध्यं निरू
पिते तद्द्वारेण करणान्तराणामपि त्रैविध्यमुपलक्षितम् करणस्थानितिकर्मत्वेनापेक्षितादित्तिकर्मत्वेना
याम्नसृत्यादिपंचकरूपेणापि श्रद्धायाः सर्वेपुरुषतादिविदिशाविविदिशयोश्च धृतिस्सत्वेभ्यामादेपानयो
स्त्रैविध्यम् धृतेश्चेमनेनगच्छविविक्षतो मितिनेनचोक्तमितिनदोषः सर्वभूतेषु येनैकं भावमव्ययमीक्षते अ
विभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम् २० पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् वेत्ति सर्वेषु भूतेषु
तज्ज्ञानं विद्धि राजसम् २१ यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् अतत्वार्थवदल्पं च तत्तामसमुदा
हृतम् २२ नियतं संगरहितमरागद्वेषतः कृतम् अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते २३ यत्तु कामे
प्सुना कर्म साहंकारेण वा पुनः क्रियते क्लेशबहुलं तद्राजसमुदाहृतम् २४ अनुबन्धं क्षयं हिंसामनपेक्ष्य
च पौरुषं मोहादारभ्यते कर्म यत्तत्तामसमुच्यते २५ मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्यो
र्निर्विकारः कर्ता सात्विक उच्यते २६ रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः हर्षशोकान्वितः कर्ता
राजसः परिकीर्तितः २७ अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः विषादी दीर्घसूत्री च कर्ता तामस उच्य

गी॰
सं॰
६॰
60

नैः विभक्तेष्टदेवमनुष्यादितया पृथक्त्वेनशठमेमीतिनिरमेठ्ठपरस्मादिष्कृया प्रहोनकंकारणमविचार्यै
व अभिनिवेशावेशवशात्क्रोधरागादिग्रहणोयनम्रामसमेश्ले नियतेकर्मव्यमिति लेशेरविषाहैवेंद्रले
व्यामे मोहादिभिनवेशमयात् प्रदेकर्त्रेतिनिवदेत्तकलीलसहमेत्तन्माधुकारीवायोभवतीतिनेदवादी
त्पनेनशीनिनाव्यवहारमात्रमेहनिवशेनयोगिनोप्यहंकरोमीतिवचोननिषिद्धं हर्षशोकान्वितःसि
द्ध्यसिद्ध्योः निकृतिनैष्कृत्यणम् २८ बुद्धेर्भेदंधृतेश्चैवगुणतस्त्रिविधंशृणु प्रोच्यमानमशेषेणपृथक्त्वेनध
नंजय॥२९॥ प्रवृत्तिंचनिवृत्तिंचकार्याकार्येभयाभये बंधंमोक्षंचयाबुद्धिर्वेदसासात्विकीमता॥३०॥ ययाधर्ममध
र्मंचकार्यंचाकार्यमेवच अयथावत्प्रजानातिबुद्धिःसापार्थराजसी॥३१॥ अधर्मंधर्ममितियामन्यतेतमसावृ
ता सर्वार्थान्विपरीतांश्चबुद्धिःसातामसीमता॥३२॥ धृत्याययाधारयतेमनःप्राणेंद्रियक्रियाः योगेनाव्यभि
चारिण्याधृतिःसासात्विकीमता॥३३॥ ययातुधर्मकामार्थान्धृत्याधारयतेर्जुन प्रसंगेनफलाकांक्षीधृ
तिःसापार्थराजसी॥३४॥ ययास्वप्नंभयंशोकंविषादंमदमेवच नविमुंचतिदुर्मेधाधृतिःसापार्थतामसीम
ता॥३५॥ सुखंत्विदानींत्रिविधंशृणुमेभरतर्षभ अभ्यासाद्रमतेयत्रदुःखांतंचनिगच्छति॥३६॥ यत्तदग्रेविषमिव
परिणामेमृतोपमम् तत्सुखंसात्विकंप्रोक्तमात्मबुद्धिप्रसादजम्॥३७॥ विषयेंद्रियसंयोगाद्यत्तदग्रेमृतोपमं

परिणामेविषमिवतद्राजसमितिस्मृतं ॥३८॥ यदग्रेचानुबंधेचसुखंमोहनमात्मनः निद्रालस्यप्रमादोत्थंतत्ता
मसमुदाहृतम् ॥३९॥ नतदस्तिपृथिव्यांवादिविदेवेषुवापुनः सत्वंप्रकृतिजैर्मुक्तंयदेभिःस्यात्त्रिभिर्गुणैः ॥४०॥ बुद्धि
निश्चयःधृतिःसंतोषःसर्वादिस्वकर्तव्येःकृतेवाकृतेनेवधपेकृतेकरणीयेकिममेनेतिधियेरहस्यानि
प्रमथ्याक्रियाभोग्नुपरमेकोहेतुःस्यात् अतःसर्वेषामेवधृतिरस्तीतितात्पर्यार्थः यदायत्नप्रसिद्धाव्या
ख्यायतेएव अथयावदसम्यक् मनःप्राणेंद्रियक्रियायोगेनधारयति यथाकिममोपभोगादिभिः।
सर्वेष्वेवात्माराममेभूयासमितिमन्वानः प्रसंगेनेतितत्त्वाभिनिवेशेन निद्राकलहादिष्वेवयथासंतो
षंवधातिनस्यातयासानामसौधृतिः तदानेभ्यासकालेविषमिवजन्मशतान्यभ्यस्तविषयसंगस्यदुःपरि
हरत्वात् उक्तंचकृतौ त्वरसयाताविषमाद्भुतमयेस्मादि आत्मप्रसादाद्बुद्धिप्रसादोजायतेअसमसापेक्ष
प्राणस्याभावात् विषयेंद्रियाणांपरस्परसंयोगजंस्वयंचवत्सप्पवदुपसंवेद्यात् निद्रातथालस्येनश
दतयाप्रमादेनसर्वव्याख्यानेनयत्नदुःखेनतन्नामसंपवेकर्तृकर्मकारणानांबुद्धिधृत्योः सुखस्यचसत्वादिभे
दभिन्नानांपरस्परंगोणिभाववाध्यवाधकतसमुच्चयाहृतिक्रमयोगपद्यादियोगादपरिसंख्येयभेदत्वाद्धि
विधफलप्रसवसमर्थत्वमिमनेनकर्मणांप्राकरहृत्येगदनतेविततमपदेतत्केनिर्णीते सर्वैवैतेदवतादि

गी॰ सं॰ ६२

61

स्थावरान्तानां गुणत्रयसंबन्धेनातिक्रामेति ॥ उक्तं हि । आब्रह्मस्तम्बकीटान्तं न कश्चिन्नवतः स्ववीति तन्नतो
द्विस्वत्वागुणातिक्रान्तमनसो नेतरस्मात्पापः ॥ ४० ॥ एवमियता ग्रन्थेनानेकेत्रिस्वरूपत्वे श्रमादीनां च प्रति
पादितेन तन्मध्यात्मविकीराशौवं स्मानो दैवीसंपद्ग्राम इहस्थाने योग्यः । तेन तथाविधस्य स्वज्ञेनः श्रोत्रादि
नः प्रधुनानिरस्यव्यैत यदिता वदनया शास्त्रानयुग्म कर्मणामवान्तरे ते तदा स्वधर्मप्रवृत्त्या विज्ञानपूर्वक
यावत्कर्म संबंधस्तावत् अप्येतत्तेनानुसमस्येनदवशेषं तवप्रवृत्तानां ब्रह्मक्षत्रजाति रेवन तथाभावे स्थितिनात् यतः
सर्वः स्वस्वभावनियतः । कृतश्चिदेशान्तरे दिकितनतस्वभावकं विकाले भूतानामपि नतिरोधाय कवित्तमे स्वभा
वं प्रकापयेत् लभन एव तथाश्चैवं विधो वर्णानां स्वभावः एवमवशेषभावि मां महामोनतः फलविभागिता
भावेन तदाह ॥ ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप । कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१ ॥ शमो
दमस्तपः शौचं क्षान्तिरार्जवमेव च । ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ ४२ ॥ शौर्यं तेजो धृतिर्दाक्ष्यं
युद्धे चाप्यपलायनम् । दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ ४३ ॥ कृषिगोरक्षवाणिज्यं वैश्यकर्म स्वभाव
जम् । परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ ४४ ॥ स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः । स्वकर्मनिरतः
सिद्धिं यथा विन्दति तच्छृणु ॥ ४५ ॥ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मा

नरः ॥४६॥ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ॥ स्वधर्मे निधनं श्रेयः परधर्मोस्यात्स्वपि ॥ स्वभावनियते
कर्म कुर्वन्नाप्नोति किल्बिषम् ॥४७॥ सहजे कर्म कौंतेय सदोषमपि न त्यजेत् ॥ सर्वारंभा हि दोषेण धूमेनाग्निरिवा
वृताः ॥४८॥ असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥४९॥ सिद्धिं प्राप्तो यथा
ब्रह्म तथाप्नोति निबोध मे समासेनैव कौंतेय निष्ठा ज्ञानस्य या परा ॥५०॥ बुद्ध्या विशुद्धया युक्तो धृत्यात्मा
नं नियम्य च शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥५१॥ विविक्तसेवी लघ्वाशी यतवाक्कायमानसः
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥५२॥ अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् विमुच्य निर्ममः शां
तो ब्रह्मभूयाय कल्पते ॥५३॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ॥५४॥
भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥५५॥ सर्वकर्माण्यपि सदा
कुर्वाणो मद्व्यपाश्रयः मत्प्रसादादवाप्नोति शाश्वते परमव्ययं ॥५६॥ चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥५७॥ मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि अथ चेत्त्वमहंकारान्न
श्रोष्यसि विनंक्ष्यसि ॥५८॥ यदहंकारमाश्रित्य न योत्स्य इति मन्यसे मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्य
ति ॥५९॥ स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोपि तत् ॥६०॥ ईश्वरः सर्वभू

नी॰ मं॰ ८२

62

नान्तोस्य हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ॥ तमेव शरणं गच्छ सर्वभावेन भा
रत तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतम् ॥ इति ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया विमृश्यैतन
दशेषेण यथेच्छसि तथा कुरु ॥ सर्वगुह्यतमं भूयः शृणु मे परमं वचः ॥ ब्राह्मणादीनां कर्मप्रविभागनि
रूपणस्य स्वभावो वशं परमतिक्रमतीति तत्त्वियस्वभावस्य भवतो निष्क्रांतोपि प्रकृतिः स्वभावाख्या नियो
क्ता मम व्यभिचारेण भजने केवलं तया नियुक्तस्य गुणपाप्मेवं यः अतो मदभिहितविज्ञानप्रमाणपुरः
सरीकारेण कर्माण्यनुतिष्ठ तथा सति वेधीनिवस्मनीमस्मार्थस्य परिकरत्वेथ यद्रनतानयं मद्वाक्या
र्थस्य अवीतस्वाक्यानोस्यष्टार्थः मैतेषणज्ञानस्य भागकस्य निष्ठा वा गजालपरिहारेण निश्चितमादृ
त्ताविमुद्धयेमादि सर्वमेतद्याख्यानमिति निगूढनारायणस्तेत यथेश्वरः परमात्मा व शेषशरणेन तथास्यः
तत्रहयाधिष्ठानरकर्मे विवक्षितव्यानामये विप्रक्षेन कर्माणि स्थितिभोजि भवेति नहि निशितनखरनखरैको
ति विदारितसमदकरिकरटगलितमुक्ताफलनिकरपरिकरप्रकाशितप्रतापमदसिंहकिशोर
के गुहामधितिष्ठति चपलमनसो विहंगमामात्रबलशालिनो दहिणपोतकाः सैरं स्वव्यापारपरिशी
लनापटुभावमवलंबंते इति तमेव शरणं गच्छेत्युपक्रम्य मत्प्रसादादिति निर्वादवाक्याम मिदं यद्भगवान्पर

मात्मानमीश्वरं वा सदेवं वैकल्पतया योजयतीति मदेवं ते ज्ञानमुक्तं गुह्याद्गुह्यतरं लोकादपि गुह्यात्परमात्मतत्त्वप्रका
शनात् एतच्चाशेषेण विमृश्येति नाम यथा मन्त्रविचार्य यथास्थैः तथैतामयं यथावमरमस्माभिः स्वेच्छया ग्राहिक
यैवमप्रकाशितम् यद्यपि तथापि स्फुटमशेषविमर्शने प्रदर्श्यते उपादेयतमेत्याह: नास्मिन्निरूप्यमाणे गुह्य
माणे वा मति न्नरूप्यति ६४ गुह्यतमे यदत्र निश्चितं तत्स्थानमिदानीं सूत्रविमाह ॥ इष्टोसि मे दृढमिति ततो
वक्ष्यामि ते हितम् ॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ सर्व
धर्मान्परित्यज्य मामेकं शरणं व्रज अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ मन्मना भवेत्यादिना शास्त्रेऽवला
पेन पदं सर्वेष्वा मया थायमिति निश्चितं तत्स्त्रलापेणकाचिणः शास्त्रमिदं स्मर्थं वदितं सर्वं आदरच सर्वधर्मान्परित्यज्ये
ति यदिदं गुरुकरणामास्तिकवेद्ध वथादितस्य सर्वस्मादेकत्वमात्मथमेतोपविन्यज्य तथा दायादि हतना
क्रियानिषेधमस्मथमोभविष्यनीति मनसा विहाय मामेवैकं सर्वकर्मारं परमेश्वरं स्वतन्त्रं शरणं सर्वस्वभावा
यिह्यायकत्वया व्रज अतएवाहं सर्वेभ्यः सर्वेभ्यः पापेभ्यस्त्वां मोक्षयिष्यामीति मा शुचः किं कर्तव्यतामोह
मागाः ६६ इदं ते नातपस्काय नाभक्ताय कदाचन न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ य इदं परमं गुह्यं
मद्भक्तेष्वभिधास्यति भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयम् ॥ न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः

गी॰ सं॰
६३
63

भविता न च मे तस्मादन्यः प्रियतमो भुवि ॥६९॥ अध्येष्यते च य इमं धर्म्यं संवादमावयोः ज्ञानयज्ञेन तेनाहमिष्टः
स्यामिति मे मतिः ॥७०॥ श्रद्धावाननसूयश्च शृणुयादपि यो नरः सोपि मुक्तः शुभांल्लोकान्प्राप्नुयात्पुण्यकर्म
णां ॥७१॥ कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा कच्चिदज्ञानसंमोहः प्रणष्टस्ते धनंजय ॥७२॥ इदं ते इत्यादि
नास्य ज्ञानस्य गोप्यमानत्वे सिद्धिर्देशवर्जनाविषयत्वात् तपस्तानावमापर्येश्यो विशीर्णाकृशालपरिपा
कोन्मुखेनाभवतीति एवं नपस्तपसः श्रद्धा जायते सेवाग्रभक्तिः श्रद्धाप्युपजाता कदाचिद्विप्रयोदतिसोद
मिनीवत्वणाहृष्टत्वात् ततस्तस्य रोहेश्यानमिक्काभवति इयदपि च कस्यचिदसीक्षेरवत्तनि शुश्रूषा
ख्यापिज्ञानेभवति सेक्षेपिवा कस्यचित्फलार्थितया फलमेव प्रधानीकृत्य भगवंते च स्वात्मानं तदुपक
रणपात्रीकरणेन नम्रकृस्म भवेत् यदुक्तं शुश्रूषश्च कर्मार्थित्वात्कर्मण्यपि फलार्थित्वादिति एवं समभ्यस्य
पि भगवत्सतयेवानादरः इमर्थः भक्तिमिति एतदेव मयि भक्तिकरणे यदुक्तं छतस्रिरूपणे अभिध्यास्यति
अभिप्रायेण शास्त्रोक्तप्रक्रियया थास्यति वितरिष्यति सम समयन्मेमृतेति विधिविशेषनार्थवादः एवमनु ॥७२॥
अर्जुन उवाच नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत स्थितोस्मि गतसंदेहः करिष्ये वचनं तव ॥७३॥ न
ष्टो मोह इत्यादिना गुरुग्रहनिस्तावदर्जुनस्यामानत्व सम्यक्कृतत्वविनिज्ञानमिति गुरुवचनभाविनो नुगीतार्थ

स्यावकाशोदत्तानि ॥ संजयउवाच इत्यहंवासुदेवस्यपार्थस्यचमहात्मनः संवादमिममश्रौषमद्भुतं
रोमहर्षणं ॥ ७४ ॥ व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहंपरम् योगंयोगेश्वरात्कृष्णात्साक्षात्कथयतःस्वयम् ॥ ७५ ॥ राज
न्संस्मृत्यसंस्मृत्यसंवादमिममद्भुतं केशवार्जुनयोःपुण्यंहृष्यामिचमुहुर्मुहुः ॥ ७६ ॥ तच्चसंस्मृत्यसंस्मृत्यरूपमत्यद्भु
तंहरेः विस्मयोमेमहान्राजन्हृष्यामिचपुनःपुनः ॥ ७७ ॥ यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्धरः तत्रश्रीर्विजयो
भूतिर्ध्रुवानीतिर्मतिर्मम ॥ ७८ ॥ संजयवचनेनसंवादस्यपसंदर्शनेनदर्थस्यगाढमवबोधक्रमेणनिवेदनात् चिंतासंताने
पहतेनसंजयोदेवचोतस्यपरिस्फुटनिर्विकल्पानुभवरूपतामापाद्यमानेस्मरणमात्रेणैवपरवशस्तत्प्रदायकमि
त्युच्यते एवंभगवदर्जुनसंवादमात्रस्मरणादेवतन्मावास्याःश्रीविजयविभूतयइतिशिवम् ॥ ७८ ॥ संग्रहश्लो
भक्त्याज्ञानविमोहमेघपरमंयीसत्यादिभिन्नोपियेमाध्यस्थात्मविबोधसंदर्शनयाविश्वंविकल्पान्तिगम् यत्किंचि
त्स्वरसात्पदेंद्रियनिजव्यापारमात्रस्थितेर्देहलानःकृतेनतदसमसकलंसेपद्यतेशंकरम् इतिश्रीभगवद्गी
तार्थसंग्रहेअष्टादशोध्यायः १८ श्रीमान्कात्यायनोभूद्दस्कविसदृशःअस्फुरद्धोघत्समस्तसुशालेकतोयः
स्थिरमतिरभवत्सोशिकान्तोतिविद्वान् विप्रःश्रीभूतिराजस्तदनुसमभवत्तस्यसूनुर्महात्माहात्मायेनामी
सर्वलोकास्तमसिनिपतिताःप्रोद्धृताभानुनेवतस्यपलाकमलमधुपोभगवद्गीतार्थसंग्रहेव्यरचयान् श्रीम

वं १०

गी०
सं०
६४

64

नवगुप्तः सहृज्जलोटककृतवेदनावशानः अनरदमया
याथार्थ्यैवायथार्थमपिसर्वथानैव विदुषामन्वयनीयेक्रम
मिदेवोयथार्थेदि पवित्रितोयंश्रीभगवद्गीतार्थसंग्रहः स
तिह्निनयनचरणचिंतनलब्धप्रसिद्धेरभिनवगुप्तस्येतिशिवम्
अभिनवरूपाशक्तिस्तद्गर्भोयोमहेश्वरोदेवः तदुभययामलरू
पमभिनवगुप्तंशिवंवंदे॥ अभिनवगुप्तकृतटी० ६